Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीरामजयम्

श्रीमदप्पय्यदीक्षितविरचितः

कुवलयानन्दः

(वृत्तिरहितः)

समन्वयाख्यव्याख्योपेतः—प्रथमो भागः

THE KUVALAYANANDA

OF

APPAYYA DIKSHITA

(Without Vritti)

With the commentary Samanvaya in Sanskrit and English—(Part I)

BY

T. K. RAMACHANDRA AIYAR, M.A., B.O.L.,

Retd. Principal, Govt. Sanskrit College

Tripunitturai, (Kerala State)

PUBLISHED BY

R. S. VADHYAR & SONS,

BOOK-SELLERS & PUBLISHERS,

KALPATHI : : PALGHAT—678003,

S. INDIA.

1978

Sanskrit Book House
Mysore-570001.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Second Edition 1978

Printed at New Bharathi Vijayam Printers,
5, Venkatachala Chetty St., Triplicane, Madras-5.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

PREFACE

Appayyadīkshita's Kuvalayānanda requires no introduction as it is the most popular work on figures of speech in Sanskrit. Taking Jayadeva's Chandrāloka as the basis, Appayyadīkshita has defined and illustrated many new Alaṅkāras also after taking into account the views of ancient and modern authors on the subject. He has also made amendments and alterations to the definitions and illustrations of Chandrāloka. Excluding Jagannātha Pandita's Rasagaṅgādhara, Kuvalayānanda is perhaps the latest work covering the whole field of Arthālaṅkāras in Sanskrit and this fact alone is sufficient reason for its popularity. Moreover, this has been accepted as the standard Alaṅkāra work in most of the modern Indian languages and that is another reason for its popularity.

The body of Kuvalayānanda is in the form of Kārikas and Vṛtti. The Kārikas give simple definitions and illustrations of the Alaṅkāras while the Vṛtti elaborates the definitions wherever necessary and gives additional illustrations. There are also some discussions which are not of much use to the beginners though they are essential for the advanced study of Alaṅkāras. This being the first and very often, the last work on Alaṅkāra prescribed for

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

the Degree Course in Arts and Science Colleges, and the Pre-Degree Course in Sankrit Colleges, too many illustrations and discussions on subtle points tend to confuse or put too heavy a burdon on college students who are not yet ready to receive them. Therefore a new edition of Kuvalayānanda omitting the discussions and giving only the minimum number of additional examples has become the urgent need of college students. Our effort in bringing out this edition is only to satisfy this need.

To help the students in understanding the text without much strain and for giving them some training in answering questions on Alaṅkāra, we have added a lucid commentary in Sanskrit for the whole text and an English commentary for forty seven Alaṅkāras which are usually prescribed for the Degree Courses in Arts and Science Colleges where the medium of instruction is English. The commentary has been written with an eye on the needs of these students and the emphasis is on the application of definitions to the illustrations. The main points of difference between Alaṅkāras are also made clear wherever necessary.

This book is published in two parts. In the first part we have included fifty Alaṅkāras, forty one in the order of the original text and nine selected from here and there keeping in view the needs of sutdents in Arts and Science Colleges. The rest of the Alaṅkāras along

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

with an appendix and index of verses is given in the second part. It is our hope that this work will enable the students to acquire a sound knowledge of the Alaṅkāras of Kuvalayānanda and prepare them for the study of advanced works like Chitramīmāmsā and Rasagaṅgādhara.

Palghat,
15-11-72

T. K. RAMACHANDRA AIYAR.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कुवलयानन्दे विषयानुक्रमणिका - CONTENTS

	मङ्गलाचरणम्	.... १
१.	उपमालङ्कारः	.... ३
२.	अनन्वयालङ्कारः	.... ११
३.	उपमेयोपमालङ्कारः	.... १२
४.	प्रतीपालङ्कारः	.... १३
५.	रूपकालङ्कारः	.... २०
६.	परिणामालङ्कारः	.... २७
७.	उल्लेखालङ्कारः	.... २८
८.	स्मृत्यलङ्कारः	.... ३२
९.	भ्रान्त्यलङ्कारः	.... ३३
१०.	सन्देहालङ्कारः	.... ३४
११.	अपह्नुत्यलङ्कारः	.... ३४
१२.	उत्प्रेक्षालङ्कारः	.... ४४
१३.	अतिशयोक्त्यलङ्कारः	.... ५१
१४.	तुल्ययोगितालङ्कारः	.... ६३
१५.	दीपकालङ्कारः	.... ६९
१६.	आवृत्तिदीपकालङ्कारः	.... ७१
१७.	प्रतिवस्तूपमालङ्कारः	.... ७४
१८.	दृष्टान्तालङ्कारः	.... ७५

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

१९. निदर्शनालङ्कारः ७७
२०. व्यतिरेकालङ्कारः ८३
२१. सहोक्त्यलङ्कारः ८४
२२. विनोक्त्यलङ्कारः ... ८५
२३. समासोक्त्यलङ्कारः ८७
२४. परिकरालङ्कारः ८९
२५. परिकराङ्कुरालङ्कारः ९१
२६. श्लेषालङ्कारः ९२
२७. अप्रस्तुतप्रशंसालङ्कारः ९६
२८. प्रस्तुताङ्कुरालङ्कारः ९८
२९. पर्यायोक्तालङ्कारः १००
३०. व्याजस्तुत्यलङ्कारः १०२
३१. व्याजनिन्दालङ्कारः १०५
३२. आक्षेपालङ्कारः १०६
३३. विरोधाभासालङ्कारः ११०
३४. विभावनालङ्कारः ११२
३५. विशेषोक्त्यलङ्कारः ११७
३६. असंभवालङ्कारः ११८
३७. असंगत्यलङ्कारः ११९
३८. विषमालङ्कारः १२४
३९. समालङ्कारः १२६

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

४०. विचित्रालङ्कारः १३०
४१. अधिकालङ्कारः ... १३०
४२. प्रत्यनीकालङ्कारः ... १३२
४३. काव्यार्थापत्यलङ्कारः ... १३३
४४. काव्यलिङ्गालङ्कारः ... १३५
४५. अर्थान्तरन्यासालङ्कारः ... १३६
४६. विकस्वरालङ्कारः ... १३९
४७. वक्रोक्त्यलङ्कारः ... १४०
४८. स्वभावोक्त्यलङ्कारः ... १४१
४९. भाविकालङ्कारः ... १४१
५०. उदात्तालङ्कारः ... १४२
५१. अनुबन्धः ... १४३

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीरामजयम्

अप्पय्यदीक्षितविरचितः कुवलयानन्दः

(वृत्तिरहितः)

समन्वयाख्यव्याख्योपेतः

मङ्गलाचरणम्

अमरीकबरीभारभ्रमरीमुखरीकृतम् ।
दूरीकरोतु दुरितं गौरीचरणपङ्कजम् ॥ १ ॥

अमरीणां देवस्त्रीणां करीभारेषु केशपाशेषु सौगन्ध्यलोभात्संसृष्टा या भ्रमर्यः ताभिः मुखरीकृतं गौर्याः चरणमेव पङ्कजमिति मयूरव्यंसकादित्वात्समासः, अथवा चरणं पङ्कजमिवेत्युपमितसमासः, पङ्कजसदृशं चरणं दुरितं दूरीकरोतु विनाशयत्विति प्रार्थनायां लोट् ।

May the lotus-like foot of Parvathi resounding with the humming of bees hovering ever the weighty lock of celestial damsels, drive away our sins. 1

परस्परतपःसम्पत्फलायितपरस्परौ ।
प्रपञ्चमातापितरौ प्राञ्चौ जायापती स्तुमः ॥ २ ॥

परस्परस्यान्योन्यस्य तपःसम्पदः फलायितं फलवदाचरितं परस्परमन्योन्यस्वरूपं ययोस्तौ, पार्वतीतपःसम्पत्तिफलायितः परमेश्वरः,

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

परमेश्वरतपःसम्पत्तिफलायिता च पार्वतीत्यर्थः, प्रपञ्चस्य सर्वस्यापि मातापितरौ जनिकर्तारौ हितकारिणौ च प्राञ्चौ पुरातनौ जायापती दंपती पार्वतीपरमेश्वरौ स्तुमः। स्तोत्रेण च नम्रता प्रतीयत इति नमस्क्रियात्मकं मङ्गलम्.

We salute the ancient couple who are the parents of the Universe and who had made each other the fruit of their mutual penance. 2

ग्रन्थस्य विषयप्रयोजने

अलंकारेषु बालानामवगाहनसिद्धये।
ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ॥ ३ ॥

अलङ्कारेषु प्रकृते अर्थालङ्कारेषु उपमादिषु बालानां ग्रहणधारणशक्तानामप्यलङ्कारविषये अव्युत्पन्नानां अवगाहनसिद्धये व्युत्पत्तिसिद्ध्यै तेषामलङ्काराणां लक्ष्यलक्षणयोः संग्रहः, संक्षेपेणः लक्षणमुदाहरणं च, ललितः सुग्राह्यः क्रियते। अत्र पूर्वार्धे प्रयोजनमुक्तम्, उत्तरार्धे च प्रतिपाद्यो विषयः प्रतिज्ञातः। असाधारणो धर्मः लक्षणम् लक्ष्यमुदाहरणम्। तथा च बालव्युत्पत्त्यर्थमुपमादयः अर्थालङ्काराः लक्षणोदाहरणाभ्यां सङ्ग्रहेण निरूप्यते इति ग्रन्थकारः प्रतिजानीते।

To enable the young students to understand the Figures of speech (Arthālaṅgaras like Upama etc) they are explained here briefly with simple definitions and illustrations. 3

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

१. उपमालङ्कारः—पूर्णोपमा

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ॥ ४ ॥

यत्र यस्मिन् काव्ये द्वयोर्वस्तुनोरुपमानोपमेयत्वेन प्रसिद्धयोः सादृश्यस्य लक्ष्मीः संपत्, सहृदयहृदयाह्लादि सादृश्यमित्यर्थः, उल्लसति उद्भूततया भाति (व्यङ्ग्यमर्यादां विना) स्पष्टं प्रकाशते सा तथाभासमाना सादृश्यलक्ष्मीरुपमा इति लक्षणम् । हे कृष्ण ते तव कीर्तिः हंसीव स्वर्गङ्गामाकाशगङ्गामवगाहते इत्युदाहरणम् । अत्र कीर्तिहंस्योः सादृश्यलक्ष्मीः स्पष्टं प्रकाशत इत्युपमालङ्कारः ।

उपमायाः सन्ति चत्वारोऽवयवाः- उपमानम्, उपमेयम्, साधारणधर्मः, उपमावाचकश्चेति । तत्राधिकगुणवत्त्वेन प्रसिद्धमुपमानं चन्द्रादि । प्रकृते वर्ण्यमानं मुखाद्युपमेयं न्यूनगुणम् । आह्लादकत्वादिकं साधारणो धर्मः । इवादिशब्दाः सादृश्यवाचकाः । सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् ।

संक्षेपतः उपमा द्विविधा - पूर्णा, लुप्ता चेति । यत्र चतुर्णामप्युपमावयवानामुपादानं तत्र पूर्णोपमा, यथा हंसीवेत्यादिर्भूर्वोदाहृते हंसी उपमानम्, कीर्तिरुपमेयम्, स्वर्गङ्गावगाहनं साधारणो धर्मः, इवशब्दः उपमावाचक इति चतुर्णामप्युपादानात्पूर्णोपमा ।

That is Upamā (simile) where a wealth of similarity between two objects is clearly expressed. A comparison

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

of two similar objects is Upamā. When an object is compared to itself, the Alaṅkāra is Ananvaya. Upama becomes an Alaṅkara only when the similarity is attractive.

Example:—O ! Krishna, your fame bathes in the heavenly Ganges like a female swan. Here an attractive similarity is expressed between fame and the she–swan and hence Upamalaṅkāra.

Upama consists of four elements—(1) Upamāna, the standard of comparison; (2) Upameya, the object described in the context; (3) Sādhāranadharma, common attribute of Upamāna and Upameya and (4) Upamāvācaka the word denoting similarity. Where all the four elements are expressed, there the figure is called Pūrṇopama. In the given example कीर्ति - fame is उपमेयम्, हंसी - she - swan उपमानम्, स्वर्गङ्गावगाहनं - bathing in the heavenly Ganges is the साधारणधर्मं and इव - like is उपमावाचकम्। Thus this is an example of पूर्णोपमा because all the four elements are expressed.

When the similarity of two objects is suggested and not expressed, it is उपमाध्वनि and not उपमालङ्कार.

अलङ्कार may be broadly defined as उक्तिवैचित्र्यम् - a figurative mode of expression. The same idea is expressed in different attractive modes and they become different Alaṅkaras. Many of the Alaṅkaras are based on similarity and hence उपमा is given the first place. 4

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पूर्णोपमाया अपरमुदाहरणम्

गुणदोषौ बुधो गृह्णन् इन्दुक्ष्वेडाधिवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥

अत्र बुधः उपमेयम्, ईश्वरः उपमानम्, इवशब्दो वाचकः, साधारणधर्मस्तूपमानोपमेययोर्नैकः, किन्तु उपमानगतयोश्चन्द्रगरलयोः उपमेयगतयोर्गुणदोषयोश्च बिम्बप्रतिबिम्बभावेनाभेदाध्यवसायात्, तथा उपादानज्ञानयोः गृह्णन्नित्येकपदोपादानेनाभेदाध्यवसायाच्च साधारणधर्मता परिकल्प्यते । तस्मादत्र पूर्णोपमैव ।

वस्तुतो भिन्नयोरप्युपमानोपमेयधर्मयोः परस्परसादृश्यादभिन्नतयाध्यवसितयोः पृथगुपादानं बिम्बप्रतिबिम्बभावः ।

लुप्तोपमा, तल्लक्षणञ्च

वर्ण्योपमानधर्माणामुपमावाचकस्य च ।
एकद्वित्र्यनुपादानाद्भिन्ना लुप्तोपमाष्टधा ॥ ५ ॥

उपमानोपमेयसाधारणधर्मवाचकानां चतुर्णां मध्ये एकस्य, द्वयोस्त्रयाणां वा अनुपादानादप्रयोगात् लुप्तोपमा भवति । अवयवलोपाद् लुप्तेत्यन्वर्थसंज्ञा । वर्ण्यं उपमेयम्, अवर्ण्यमुपमानम् ।

लुप्तोपमाष्टधा भिन्ना - तद्यथा - (1) वाचकमात्रलोपाद्वाचकलुप्ता (2) धर्ममात्रलोपाद्धर्मलुप्ता (3) धर्मवाचकयोर्लोपाद्धर्मवाचकलुप्ता (4) वाचकोपमेययोर्लोपाद्वाचकोपमेयलुप्ता (5) उपमानमात्रलोपादुपमान-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लुप्ता (6) वाचकोपमानयोर्लोपाद्वाचकोपमानलुप्ता (7) धर्मोपमानयोर्लोपाद्धर्मोपमानलुप्ता (8) धर्मोपमानवाचकानां लोपाद्धर्मोपमानवाचकलुप्ता इति।

By the omission of one, two or three of the four elements constituting Upama, viz. उपमेय, उपमान, साधारणधर्म and वाचकशब्द, the Upamā is called Luptā. Luptopama is divided into eight types as follows— 1. वाचकलुप्ता by the omission of वाचक 2. धर्मलुप्ता by the omission of साधारणधर्म 3. धर्मवाचकलुप्ता by the omission of both धर्म and वाचक. 4. वाचकोपमेयलुप्ता by the omission of वाचक and उपमेय, 5. उपमानलुप्ता 6. वाचकोपमानलुप्ता 7. धर्मोपमानलुप्ता and 8. धर्मोपमानवाचकलुप्ता 5

लुप्तोपमोदाहरणानि

तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्मम।
कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया॥ ६॥
यत्तया मेलनं तत्र लाभो मे यच्च तद्गतेः।
तदेतत्काकतालीयमवितर्कितसम्भवम्॥ ७॥

(1) तडिद्गौरी तन्वी (मया रहसि दृष्टा) इति वाचकलुप्ताया उदाहरणम्। तडिदिव गौरीत्यर्थेविवक्षिते "उपमानानि सामान्यवचनैः" इति समासे इवशब्दस्य वाचकस्य लोपाद्वाचकलुप्ता। तन्वी उपमेयम् तडिदुपमानम्, गौरत्वं साधारणो धर्मः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तडिद्गौरी तन्वी - The slim girl, golden (in colour) like the lightning (was seen by me in a lonely place) is the example for वाचकलुप्ता। तडिद्गौरी is a compound word in the sense तडिदिव गौरी,. Sinee the वाचक 'इव' is dropped in the compound where its meaning is understood, this is वाचकलुप्ता. The gril is उपमेयं, lightning उपमानं and golden colour the साधारणधर्म.

(2) इन्दुतुल्यास्या (तन्वी मया दृष्टा) इति धर्मलुप्तायाः उदाहरणम्। इन्दुना तुल्यं आस्यं यस्याः सा इन्दुतुल्यास्या। अत्र इन्दुरुपमानम्, आस्यमुपमेयम्, तुल्यशब्दो वाचकः, साधारणधर्मस्तु कान्त्यादिर्नोपात्त इति धर्मलुप्ता।

इन्दुतुल्यास्था (तन्वी मया दृष्टा) - (The girl) whose face was equal to the moon (was seen by me) is the example for धर्मलुप्ता। इन्दुना तुल्यं आस्यं यस्या सा इन्दुतुल्यास्या. Here the face is उपमानम्, the moon उपमानम् and the word तुल्य is वाचक। साधरणधर्म like loveliness etc. is not mentioned and hence धर्मलुप्ता.

(3) (मम दृशोः) कर्पूरन्ती तन्वीति धर्मवाचकलुप्तायाः उदाहरणम्। कर्पूरमिवाचरन्तीत्यर्थे विदक्षिते आनन्दाधायकत्वा-रूपाचारार्थकस्य "सर्वप्रातिपदिकेभ्यः क्विब् वा वक्तव्यः" इति विहितस्य क्विपः इवशब्देन सह लोपाद्धर्मवाचकलुप्ता। कर्पूरः उपमानम्, तन्वी उपमेयमिति द्वयमुपात्तम्, नेत्रानन्दाधायकत्वरूपो धर्मः वाचकशब्दश्च नोपात्तौ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(मम दृशोः) कर्पूरन्ती तन्वी – The girl who was (delightful) to my eyes (like) Karpūra (was seen by me) is the example of धर्मवाचकलुप्ता। The word कर्पूरन्ती is formed by adding the suffix क्विप्- to the word कर्पूर् in the sense कर्पूरमिवाचरति—that which acts like कर्पूर, and the added suffix क्विप् is dropped along with the वाचक-इव. Thus the साधारणधर्म—acting in such a way as to give delight to the eyes and the वाचक are only implied in the word कर्पूरन्ती and not expressed, Hence this is धर्मवाचकालुप्ता। कर्पूर is उपमानम् and तन्वी उपमेयम्।

(4) कान्त्या स्मरवधूयन्ती इति वाचकोपमेयलुप्ताया उदाहरणम्। अत्र कान्त्या आत्मानं स्मरवधूमिवाचरन्तीत्यर्थे विवक्षिते "उपमानादाचारे" इति क्यच् प्रत्ययो विहितः। अत्रात्मा उपमेयम्, तच्च नोपात्तम्। वाचकशब्दोऽपि नोपात्त इति वाचकोपमेयलुप्ता। स्मरवधूरुपमानम्, कान्तिमत्त्वं साधारणो धर्मः।

कान्त्या स्मरवधूयन्ती—Showing herself like the wife of cupid by means of her splendour, is the example for वाचकोपमेयलुप्ता। The word स्मरवधूयन्ती is formed by adding the suffix क्यच् to the स्मरवधू in the sense स्मरवधूमिवात्मानमाचरन्ती। आत्मा—self, is the उपमेय which is not expressed इव, the वाचक is also drpded and hence 'वाचकोपमेयलुप्ता स्मरवधूरुपमानम् कान्तिमत्त्वं साधारणो धर्मः are both mentioned. 6

(5) तत्र (विजनस्थले) मे तद्रतेर्लाभ इति यत् अकितर्कित-सम्भवं (यादृच्छिकं) तदेतत् काकतालीयमित्युपमानलुप्ताया उदाहरणम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

काकगमनमिव तालपतनमिव काकतालं, ततः काकतालमिव काककृततालोपभोग इवेत्यर्थे विवक्षिते "इवे प्रतिकृतौ" इत्यधिकारस्थेन "समासाच्च तद्विषयात्" इति सूत्रेण छप्रत्ययो विहितः तस्य च "आयनेयीत्या" दिसूत्रेण ईयादेशः। तथा च मम तन्वीसुरतलाभरूपं यद्वस्तु अवितर्कितसम्भवं तत् काककृततालोपभोगसदृशमिति निष्कृष्टोऽर्थः।

अत्र तन्वीसुरतलाभः उपमेयम्, अवितर्कितसम्भवत्वं साधारणो धर्मः, छप्रत्ययश्च सादृश्यवाचक इति त्रयाणमुपादानमस्ति। कविकृत तालोपभोगरूपमुपमानं नोपात्तमित्युपमानलुप्ता। अत्र समासविषये काकतालशब्दौ लक्षणया तत्समवेतक्रियाबोधकौ।

मे तद्वतैलाभ इति यत् अवितर्कितसम्भवं तदेतत् काकतालीयम्—My gaining (enjoyment) of her love (intimacy) quite unexpectedly is like the unexpected enjoyment of the Tala fruit by the crow, is the example of उपमानलुप्ता। The word काकतालीयम् contains two Upamānas that are not expressed. By लक्षणा the words काक and ताल in the compound convey the activities enjoined in the crow and the Tala fruit. Thus the word has to be derived first as काकगमनमिव (काककृततालोपभोग इव)—like the enjoyment of the fruit by the crow, the suffix छ is added and thus we get the word काकतालीयम्। In the second derivation which is the example here, the उपमान, काककृततालोपभोग is not expressed but only implied and hence this is उपमानलुप्ता. The gaining of her

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

love which is the उपमेय, unexpected happeing which is the साधारणधर्म, and the suffix क which is the वाचक are the three elements expressed.

(6) तत्र मम तया मेलनं - मम तत्र गमनं तस्यास्तत्रागमनं चावितर्कितसम्भवं काकगमनमिव तालपनतमिव काकतालमिति वाचकोपमानलुप्ताया उदाहरणम्। मम तन्मेलनं काकगमनतालपतन-सदृशमावितर्कितसम्भवमिति फलितोऽर्थः। अत्र काकतालमिति "समासाच्च तद्विषयात्" इति ज्ञापकात्समासे वाचकस्य लोपः। उपमानमपि काकगमनतालपतनात्मकं समासान्तर्गतमपि न शब्दोपात्तमिति वाचकोपमानलुप्ता मम तत्समागमः उपमेयम्, यादृच्छिकत्वं साधारणो धर्मः।

मम तया तत्र मेलनमवितर्कितसम्भवं काकतालम्— My going there and her coming (our meeting) unexpecdly was like the arrival of the crow and the fall of the Tala fruit, is the example of वाचकोपमानलुप्तत। The उपमानम् - काकागमनं and तालपतनं is not expressed but only impliep in the समास where the words काक and ताल stand for the actions आगमन and पतन enjoined in them. The compound has to be dissolved as काकगमनमिव तालपतनमिव काकतालम्। The वाचक 'इव' is alsa dropped in समास. Therefore it is वाचकोपमानलुप्ता. मम तत्र तया मेलनं My going and her coming is the उपमेयं and अवितर्कितसभवं - unexpected happening is the साधारणधर्म.

7 and 8. उदाहरणश्लोके "अविर्कितसम्भवम्" इत्यस्य स्थाने "इति जानीहि हे सखे" इति पाठे साधारणधर्मस्यापि लोपे

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पञ्चमषष्ठ एव सप्तमाष्टमयोरुदाहरणे भवतः। मे तद्रतेर्लोभ इति यत् तदेतत्काकतालीयम् इति धर्मोपमानलुप्तायाः, मम तया तत्र मेलनमिति यत् तदेतत्काकतालमिति धर्मोपमानवाचकलुप्तायाश्चोदाहरणम्।

By changing the reading "अवितर्कितसम्भवम्" into "इति जानीहि हे सखे" the साधारणधर्म is also dropped and thus the examples of the fifth and sixth varieties, with the omission of साधारणधर्म, become the examples of the seventh and eighth varieties respectively. मम तद्रतेर्लोभः काकतालीयम् (काकतालोपभोगसदृशः) is the example of धर्मोपमानलुप्ता and मम तत्र तथा मेलनमिति यत्तदेतत्काकतालम् (काकगमनतालपतनसदृशम्) is the example of धर्मोपमानवाचकलुप्ता। 7

२. अनन्वयालङ्कारः

उपमानोपमेयत्वं यदेकस्यैव वस्तुनः।
इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः॥ ८॥

एकस्यैव वस्तुनः यदुपमानत्वमुपमेयत्वं च विवक्ष्यते तदनन्वयालङ्कारः। स्वस्य स्वेनैव सादृश्यं नान्वेतीत्यनन्वयसंज्ञा। तथावर्णनस्य प्रयोजनं सदृशवस्त्वन्तरव्यवच्छेदेनानुमत्वद्योतनम्। उपमायां द्वयोः साद्दश्यवर्णनमत्र त्वेकस्य तेनैवेति भेदः। इन्दुरिन्दुरिव श्रीमानित्यत्र इन्दोरेकस्यैवोपमानत्वमुपमेयत्वं च वर्णितमित्यनन्वयालङ्कारः।

When the same object is made the उपमान and उपमेय, it is अनन्वयालङ्कार. Here an object is compared to itself in order to suggest that the object is beyond comparison.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

There is some inconsistency in comparing one object to itself and hence the name अनन्वय। इन्दुरिन्दुरिव श्रीमान्---The moon is charming like the moon is the example of अनन्वय। 8

अनन्वयस्यापरमुदाहरणम्

गगनं गगनाकारं सागरः सागरोपमः।
रामरावणयोर्युद्धं रामरावणयोरिव॥

अत्र त्रिष्वप्यनन्वयेषु क्रमेण वैपुल्यगाम्भीर्यदारुणत्वानां साधारणधर्माणामुपादानं नास्ति, इन्दुरिन्दुरिव श्रीमानित्यत्र तु चतुर्णामप्यवयवानामुपादानमस्तीति विशेषः।

३. उपमेयोपमालङ्कारः

पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता।
धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि॥ ९॥

द्वयोरुपमानोपमेययोः पर्यायेण वाक्यभेदेन तदुपमानोपमेयत्वं विवक्ष्यते चेदुपमेयोपमालङ्कारः। प्रथमवाक्ये उपमानत्वेन विवक्षितस्य द्वितीयवाक्ये उपमेयत्वं, तथा प्रथमवाक्ये उपमेयस्य द्वितीये उपमानत्वं च यत्र वर्ण्यते तत्रोपमेयोपमेति निष्कर्षः। तृतीयसदृशवस्तुव्यवच्छेदः प्रयोजनम्। त्वयि धर्मः अर्थ इव पूर्णश्रीरर्थो धर्म इव पूर्णश्रीरित्युदाहरणम्। अत्र प्रथमवाक्ये उपमेयोपमानयोर्धर्मार्थयोर्द्वितीयवाक्ये उपमानोपमेयत्वं यथाक्रमं वर्णितमित्युपमेयोपमा॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

When the relationship of उपमान and उपमेय is reciprocal, the Alankara is, उपमेयोपमा। Here the उपमेय and उपमान of the first comparison become respectively उपमान and उपमेय in the second comparison and hence it is called उपमेयोपमा। त्वयि धर्मः अर्थ इव पूर्णश्रीः अर्थः धर्म इव पूर्णश्रीः—In you virtue shines fully like wealth and wealth shines fully like virtue, is the example. Here the उपमेय and उपमान in the first comparison namely-धर्म and अर्थ become उपमान and उपमेय in the second comparison and hence उपमेयोपमा. The purpose of reciprocal comparison is to suggest that there is no third similar object. 9

उपमेयोपमाया अपरमुदाहरणम्

अम्भिव जलं जलमिव खं हंस इव चन्द्रश्चन्द्र इव हंसः
कुमुदाकारास्तारास्तारकाकाराणि कुमुदानि ॥

अत्र निर्मलत्वधवलत्वादयो धर्मा नोपात्ताः, धर्मोऽर्थ इवेति पूर्वोदाहरणे पूर्णश्रीरिति धर्म उपात्त इति विशेषः।

४. प्रतीपालङ्कारः - प्रथमं प्रतीपम्

प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम्।
त्वल्लोचनसमं पद्मं त्ववक्त्रसदृशो विधुः ॥ १० ॥

उपमानस्य उपमानत्वेन प्रसिद्धस्य चन्द्रादेरुपमेयत्वप्रकल्पनमिति यत्तत्प्रतीपम्। प्रसिद्धोपमानोपमेययोर्वैपरीत्यकल्पनात्प्रतीपमित्यन्वर्थसंज्ञा। (हे तन्वि) तव लोचनसदृशं पद्मम् इत्येकमुदाहरणम्, तव वक्त्रसदृशः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मुखतुल्यो विधुश्चन्द्र इत्यपरमुदाहरणम् । तत्राद्ये प्रसिद्धोपमानस्य पद्मस्य, द्वितीये विधोश्चोपमेयत्वं कल्पितमिति लक्षणसमन्वयः । उपमानस्योपमेयत्वकल्पने उपमेयस्योपमानत्वं सिद्ध्यति । तेन चोपमानापेक्षया उपमेयस्योत्कर्षः द्योत्यते । तदेव प्रतीपप्रयोजनम् । प्रतीपं पञ्चविधम् । तत्रेदमाद्यं प्रतीपम् ।

Where an object well known as Upamāna is used as Upameya, it is प्रतीपालङ्कार. Here the relationship of उपमान and उपमेय is reversed and hence it is called प्रतीप which means reverse. त्वल्लोचनसमं पद्मम्—The lotus is equal to your eyes, is one example of प्रतीप. त्वद्वक्त्रसदृशो विधुः-The moon is similar to your face, is another example. Here the lotus and the moon which are generally used as Upamānas are made Upameyas, and the eyes and face, usually Upameyas, are made Upamānas. The purpose of reversing the usual practice is to suggest that the things described in the context—Upameyas—are superior in quality to the well-known standards of comparison (Upamānas). There are five kinds of Pratipa of which this is the first. 10

प्रथमप्रतीपस्यापरमुदाहरणम्

यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये तवमुखच्छायानुकारी शशी ।
येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गताः
त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र प्रसिद्धोपमानानां इन्दीवरशशिराजहंसानामुपमेयत्वकल्पना-त्प्रतीपम् । कान्त्यादिसाधारणधर्माणामत्रोपादानमस्तीति पूर्वस्माद्भेदो लक्षण्यम् ।

द्वितीयं प्रतीपम्

अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत् ।
अलं गर्वेण ते वक्त्र कान्त्या चन्द्रो भवादृशः ॥ ११ ॥

अन्यदवर्ण्यं उपमानं, तद्रूपं यदुपमेयं तस्य लाभेन प्राप्त्या वर्ण्यस्य मुखादेः प्रकृतस्यानादरस्तिरस्कार इति यत् तत् द्वितीयं प्रतीपम् । उपमानस्योपमेयत्वकल्पने समानेऽपि वर्ण्यस्यानादरोऽत्र विशेषः । हे वक्त्र ! ते तव गर्वेणालं, गर्वो मास्तु, यतः कान्त्या गुणेन चन्द्रोऽपि भवादृशस्त्वत्तुल्योऽस्ति, इत्युदाहरणम् । अत्रावर्ण्यचन्द्ररूपो-पमेयलाभेन वर्ण्यस्य मुखस्य 'गर्वो मास्त्वि'त्यनादरवर्णनात् लक्षण-समन्वयः ।

When the relevant object (उपमेय or वर्ण्य) is slighted by pointing out to another well-known object of high merits (उपमान) as उपमेय, we have the second variety of प्रतीप 'O ! face, discard your pride (do not be proud the moon is equal to you in beauty' is the example, Here too the उपमान - moon is made the उपमेय, but in addition, the वर्ण्य - face is slighted. Hence this is second variety of प्रतीप। विच्छित्तिविशेषादलङ्कारभेदः ॥ 11

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

द्वितीयप्रतीपस्यान्यदुदाहरणम्

गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि भद्रे ।
सन्तीदृशानि दिशि सरस्सु ननु नीलनलिनानि ॥

अत्र नीलनलिनानामुपमेयत्वं प्रकल्प्य लोचनयुगलस्य वर्ण्यस्य गर्वो मास्त्वित्यनादरो दर्शितः । साधारणधर्मस्तु नोपात्त इति पूर्वोदाहरणाद्भेदः ।

तृतीयं प्रतीपम्

वर्ण्योपमेयलाभेन तथान्यस्याप्यनादरः ।
कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्याः सन्ति हि स्त्रियः॥१२॥

वर्ण्यं यदुपमेयं तस्य लाभेन अन्यस्यावर्ण्यस्य प्रसिद्धोपमानस्य अनादरोऽपि तथा, तृतीयम् । उत्कृष्टगुणतयान्यदुपमेयमसहमानस्यावर्ण्यस्य वर्ण्यमुपमेयं प्रदर्श्यानादरोऽपि प्रतीपभेद इत्यर्थः । हे मृत्यो ! ते क्रूरतागर्वेणालं, तव गर्वो मास्तु, (क्रौर्ये) त्वत्तुल्याः स्त्रियः सन्ति इत्युदाहरणम् । अत्र वर्ण्यमुपमेयं क्रूरस्त्रियः, तल्लाभेन मृत्यौरवर्ण्यस्य क्रौर्यविषये प्रसिद्धोपमानस्य अनादरवर्णनात् लक्षणसमन्वयः द्वितीयप्रतीपवैपरीत्यादेवेदं प्रतीपम् ।

[इदमत्र चिन्त्यम् । प्रसिद्धोपमानोपमेयभावप्रातिलोम्यात्प्रतीपमित्यन्वर्थं नाम दत्तम् । सथा सति यत्र तादृशं प्रातिलोम्यं नास्ति तत्र कथं प्रतीपालङ्कारभेदत्वकल्पनमिति । वस्तुतस्त्वस्य प्रतीपभेदत्वेन परिगणनं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

न युक्तम् । उपमाप्रभेदत्वं परिकल्प्य अनादरोपमेति नामकरणं समुचितं स्यादिति प्रतिभाति । पूर्वप्रतीपवैपरीत्यात्प्रतीपमिति तु न समीचीनम्]

Where a well-known उपमान is slighted by pointing out a relevant object (वर्ण्य) possessing similar quality, it is the third variety of प्रतीप । When the उपमान does not tolerate the presence of an उपमेय owing to the possession of exceptional qualities, its pride is subdued by showing an Upameya possessing similar qualities. Thus this is a Pratipa in the sense that it is the opposite of the second Pratipa. 'O ! God of death, why are you proud of your cruelty? (please do not be proud). There are women (equally cruel) like you'. Here the उपमान-मृत्यु is slighted by pointing out the उपमेय-women who are equal to him in cruelty. By this the extreme cruelty of women is suggested.

[It appears to be improper to include this as a variety of प्रतीप whose general definition does not apply here. Only when the well-known उपमान is made the उपमेय the name प्रतीप will strictly apply. Here the उपमान stands as उपमान only. It will be more appropriate to treat this as a variety of उपमा and call it अनादरोपमा] 12

तृतीयप्रतीपस्यान्यदुदाहरणम्

अहमेव गुरुः सुदारुणानामिति हालाहल ! मास्म तात ! दृप्यः ।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata | Digitization: eGangotri.

अत्र दारुणताविषये हालाहलतुल्यदुर्जनवचनरूपोपमेयलाभेन अवर्ण्यस्य हालाहलस्यानादर इति तृतीयं प्रतीपम् ।

चतुर्थं प्रतीपम्

वर्ण्येनान्यस्योपमाया अनिष्पत्तिवचश्च तत् ।
मुधापवादो मुग्धाक्षि त्वन्मुखाभं किलाम्बुजम् ॥ १३॥

वर्ण्येन मुखादिना अन्यस्यावर्ण्यस्य चन्द्रादेः (उपमेयत्वेन कल्पितस्य) उपमाया सादृश्यस्यानिष्पत्तिवचनं यत्तत्पूर्वेभ्योऽप्युत्कर्षशालि चतुर्थं प्रतीपम् । 'हे मुग्धाक्षि अम्बुजं त्वन्मुखाभं त्वन्मुखतुल्यशोभं (किलेति वार्तायाम्) इति वार्ता मुधापवादः असत्यो जनप्रवादः' इत्युदाहरणम् । अत्र अम्बुजस्य प्रसिद्धोपमानस्य तन्वीमुखेनोपमेयेन सादृश्यस्यानिष्पत्तिः 'मुधापवाद' इत्यनेनोक्त इति लक्षणसमन्वयः ।

Describing the well-known उपमान which has been turned into उपमेय as not capable of gaining similarity with the relevant object is the fourth variety of प्रतीप- 'O ! lady of bewitching eyes, the talk that the lotus is beautiful like your face is absurd' is the example. Here the reputed उपमान, the lotus, is turned into उपमेय and then its inability to attain similarity with the face is described by the word मुधापवाद-a false talk. 13

चतुर्थप्रतीपस्यापरमुदाहरणम्

आकर्णय सरोजाक्षि वचनीयमिदं भुवि ।
शशाङ्कस्तव वक्त्रेण पामरैरुपमीयते ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र वक्त्रेण शशाङ्कस्य सादृश्यं पामरैरेवोच्यते, तच्च वचनीयमित्यनेन सादृश्यस्यानिष्पत्तिरेव प्रकाश्यते ।

पञ्चमं प्रतीपम्

प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते ।
दृष्टं चेद्वदनं तन्व्याः किं पद्मेन किमिन्दुना ॥ १४ ॥

उपमानस्य चन्द्रादेः कैमर्थ्यं निरर्थकत्वकथनं (तुल्यगुणोपमेयलाभाद्धेतोः) पञ्चमं प्रतीपम् । तन्व्याः वदनं दृष्टं चेत् पद्मेनेन्दुना वा किम् ? किमपि प्रयोजनं नास्तीत्यर्थः । अत्र तुल्यगुणोपमेयस्य मुखस्य लाभात् प्रसिद्धोपमानयोः पद्मचन्द्रयोर्निष्प्रयोजनत्वं दर्शितमिति लक्षणसमन्वयः । कः अर्थः प्रयोजनं अस्येति किमर्थः, तस्य भावः कैमर्थ्यम् ।

Where the Upamāna is described as unnecessary or useless in the presence of the Upameya, it is the fifth variety of Pratipa. 'When her face is seen, what for is the lotus or the moon?' is the example. This is a beautiful way of saying that her face is more charming than the well-known Upamānas—the lotus and the moon, and therefore, in the presence of her face, the lotus and the moon are useless. 14

पञ्चमप्रतीपस्यापरमुदाहरणम्

तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा ।
तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र नलौजसः यशसश्च स्थितौ सत्यां सूर्यचन्द्रौ वृथेति प्रसिद्धोपमानयोः सूर्यचन्द्रयोः कैमर्थ्योक्तेः प्रतीपम्।

५. रूपकालङ्कारः

विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।
रूपकं तत् त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः ॥२५॥

विषयी— उपमानभूतं पद्मादि। विषयः—उपमेयभूतं मुखादि। विषयिणो रूपेण विषयस्य अभेदताद्रूप्याभ्यां रञ्जनं स्वोपरक्तबुद्धिविषयीकरणं रूपकम्। स्वपदोपात्तस्य विषयस्य विषयिरूपेण रञ्जनं क्वचित्प्रसिद्धविषय्यभेदे पर्यवसितं, क्वचिद्भेदे प्रतीयमान एव तदीयधर्मारोपमात्रे पर्यवसितम्। ततश्च रूपकं द्विविधं—अभेदरूपकं ताद्रूप्यरूपकं चेति। तद्द्विविधमपि विषय्यपेक्षया विषयस्याधिक्योक्त्या, न्यूनत्वोक्त्या, अनुभयोक्त्या च प्रत्येकं त्रिविधम्। तथा च रूपकं षड्विधम्- 1. अनुभयाभेदरूपकम् 2. न्यूनाभेदरूपकम् 3. अधिकाभेदरूपकम् 4. अनुभयताद्रूप्यरूपकम् 5. न्यूनताद्रूप्यरूपकम् 6. अधिकताद्रूप्यरूपकम् चेति। [एतेषां षण्णां उदाहरणक्रमेणात्र निर्देशः कृतः, न तु मूलश्लोकोद्दिष्टक्रमेण] अनेनैव क्रमेणोदाहरणानि दीयन्ते।

That is रूपक in which the colour of the उपमान (विषयी) is ascribed to the उपमेय (विषय). Here the उपमेय is identified with the Upamāna without losing its own identity. Such identification is called आरोप. रूपक is of two kinds—1. अभेदरूपकम् and 2. ताद्रूप्यरूपकम्। When the उपमेय is

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

fully identified with the उपमान, it is अभेदरूपकम्। When the distinction between the उपमान and उपमेय is visible and at the same time some attributes (धर्म) of the Upamāna are ascribed to the Upameya, it is तादूप्यरूपकम्। Both these are again divided into three classes each by expressing more, less or equal attributes to the उपमेय compared with the attributes of Upamāna with which it is identfied. Thus रूपकालङ्कार has six varieties—

1. अनुभयाभेदरूपकम् 2. न्यूनाभेदरूपकम्
3. अधिकाभेदरूपकम् 4. अनुभयतादूप्यरूपकम्।
5. न्यूनतादूप्यरूपकम् and 6. अधिकतादूप्यरूपकम्।

The following are the examples in the above order. 15

(१) अनुभयाभेदरूपकस्योदाहरणम्

अयं हि धूर्जटिः साक्षाद्येन दग्धा पुरः क्षणात्।

अयं पुरोवर्ती राजा साक्षात् धूर्जटिः शिवः येन पुरः शत्रु-नगराणि क्षणात् दग्धाः इत्यनुभयाभेदरूपकस्योदाहरणम्। अत्र पुरदा-हकत्वसाम्यादयं साक्षाच्छंभुरेवेत्यभेदः प्रतीयते। विषयस्य न्यूनता-धिक्ययोश्चानुक्तेर्लक्षणसमन्वयः।

'This (king) is Siva himself who burned the cities (of the enemies) in a moment' is the example of अनुभयाभेद रूपकम्। Here the king is identified with Siva. Both

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

have destroyed the cities of the enemies and hence the attributes are equal (अनुभय); neither more nor less.

अस्यैवापरमुदाहरणम्

चन्द्रज्योत्स्नाविशदपुलिते सैकतेऽस्मिन् सरय्वाः
वादद्यूतं चिरतरमभूत्तिलब्धयूनोः कयोश्चित्।
एको वक्ति प्रथमनिहतं कैटभं, कंसमन्यः
तत्वं स त्वं कथय भगवन्! को हतस्तत्र पूर्वम्॥

अत्र 'स त्वं' इत्यनेन कंसकैटभहन्तृगरुडध्वजाभेदो वर्णनीयस्य प्रतिपाद्यते। कंसकैटभवधयोश्च पौर्वापर्यप्रश्नव्याजेन तदभेद एव दृढी क्रियते, न पुनर्न्यूनता आधिक्यं वा प्रतिपाद्यत इत्यनुभयाभेदरूपकम्

(२) न्यूनाभेदरूपकस्योदाहरणम्

अयमास्ते विना शम्भुस्तार्तीयीकं विलोचनम् ॥१६॥

तृतीयमेव तार्तीयीकं विलोचनं नेत्रं विना शम्भुरयमास्ते शम्भुरेवायं पुरोवर्ती राजा, इति न्यूनाभेदरूपकोदाहरणम्। अत्र वर्ण्यस्य राज्ञः शिवाभेदप्रतिपादनेऽपि तृतीयलोचनराहित्यरूपं न्यूनत्वमुक्तमिति लक्षणसमन्वयः।

'This king is Siva without the third eye' is the example of न्यूनाभेदरूपकम्। Here the विषय-king is identified with Siva but the absence of one attribute of the उपमान in the Upameya is also expressed by the words विना तार्तीयीकं विलोचनम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अस्यैवापरमुदाहरणम्

वेधा द्वेधा भ्रमं चक्रे कान्तासु कनकेषु च।
तासु तेष्वप्यनासक्तः साक्षाद्वर्गो नराकृतिः॥

अत्र विरक्तः साक्षाद्वर्ग इति विरक्तशिवयोरभेदे प्रतिपादिते, नराकृतिरिति विषयस्य दिव्यमूर्तिवैकल्यप्रतिपादनान्न्यूनाभेदरूपकम्।

(३) अधिकाभेदरूपकस्योदाहरणम्

शम्भुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम्।

अत्रायमिति पूर्वोदाहरणादनुषञ्जनीयम्। शम्भुरयमद्य समदृष्टितां समसंख्यलोचनतां (एकरूपदर्शनतां च) अवलम्ब्य विश्वमवति रक्षतीति अधिकाभेदरूपकस्योदाहरणम्। अत्रायं राजा शम्भुरेवेत्यभेदे प्रतिपादिते पूर्वावस्थायां विषमदृष्टिरिदानीं पुनः समदृष्टिरित्याधिक्यं विषयस्य प्रतिपादितमिति लक्षणसमन्वयः। आधिक्यमुत्कर्षः।

'This king is Siva himself who now protects the world assuming even (impartial) eyes' is the example of अधिकाभेदरूपकम्। Here the king (विषय) who is identified with Siva is said to possess now the additional (superior) attribute of having even eyes. Formerly he was inferior having uneven eyes.

अस्यैवापरमुदाहरणम्

त्वय्यागते किमिति वेपत एष सिन्धुः
त्वं सेतुमन्थकृदतः किमसौ बिभेति।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation.Kolkata Digitization: eGangotri.

द्वीपान्तरेऽपि न हि तेऽस्त्यवशंवदोऽद्य
त्वां राजपुङ्गव! निषेवत एव लक्ष्मीः॥

अत्र त्वं सेतुमन्थकृदित्यनेन राजनारायणयोरभेदः प्रतिपादितः। द्वीपान्तराणां वशंवदत्वेन जेतव्याभावात्, प्राप्तलक्ष्मीकत्वेन मन्थनप्रसक्त्यभावाच्च पूर्वावस्थापेक्षया उत्कर्षविभावनादधिकाभेदरूपकम्।

(४) अनुभयताद्रूप्यरूपकस्योदाहरणम्

अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना॥ १७॥

अस्यास्तन्व्याः मुखमेवेन्दुः मुखेन्दुस्तेन नेत्रयोरानन्दे लब्धे सति इन्दुना चन्द्रेण किम्? न किमपि प्रयोजनं, मुखेनैव चन्द्रकार्यस्य नेत्रानन्दस्य करणादित्यर्थः। अत्र मुखचन्द्रयोर्भेदे 'प्रतीयमानेऽपि 'मुखेन्दुना' इति मुखे चन्द्रत्वारोपः नेत्रानन्दकरत्वरूपतदीयधर्मारोपमात्रे पर्यवस्यति। न्यूनताधिक्ययोरनुक्तया चानुभयताद्रूप्यरूपकम्।

'When delight to the eyes is obtained by the moon of her face, what is the use of the (real) moon?. Here the real moon is mentioned as different from the moon of her face and hence there cannot be complete identification of the face (उपमेय) with the moon (उपमान)- Only the attribute of the moon नेत्रानन्दकरत्वं is ascribed to the face and there is no mention of anything more or less (आधिक्यं न्यूनता वा) in the attributes. So this is an example of अनुभयताद्रूप्यरूपकम्। 17

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

अस्यैवापरमुदाहरणम्

किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते
दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिम्बाधरे ॥

अत्र विषयविषयिणोर्मुखचन्द्रयोर्भेदे प्रतीयमानेऽपि वक्त्रेन्दाविति मुखे चन्द्रत्वारोपः चन्द्रकार्यकारित्वमात्रे पर्यवसितः, उत्कर्षापकर्षयोरप्रतिपादनाच्चानुभयतादूप्यरूपकम् ।

(५) न्यूनतादूप्यरूपकस्योदाहरणम्

साध्वीयमपरा लक्ष्मीरसुधासागरोदिता ।

इयं साध्वी पतिव्रता असुधासागरोदिता क्षीरसमुद्रादनुत्पन्ना अपरा अन्या लक्ष्मीः । अत्रापरा लक्ष्मीरित्यनेन प्रसिद्धलक्ष्मीभेदः अस्या लक्ष्म्याः प्रतीयते । तथा च साध्व्यां लक्ष्मीत्वारोपो धर्ममात्रारोपपर्यवसायी । न सुधासागरोदितेति न्यूनत्वोक्त्या च न्यूनतादूप्यरूपकम् ।

'This chaste woman is another Lakshmi not born of the milky-ocean'. Here the woman is said to be another Lākshmi and hence there is no complete identification of the उपमेय with उपमान. One attribute of the Upamāna (लक्ष्मी) of having been born of the क्षीरसमुद्र is said to be less in the Upameya and hence this is an example of न्यूनतादूप्यरूपकम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अस्यैवापरमुदाहरणम्

भवतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।
अफाललोचनः शम्भुर्भगवान् बादरायणः॥

अत्र ब्रह्मादिभिर्बादरायणस्य भेदप्रतीतेस्तादूप्यरञ्जनम्। अचतुर्वदनेत्यादिना न्यूनताप्युक्तेति न्यूनतादूप्यरूपकम्।

(६) अधिकतादूप्यरूपकस्योदाहरणम्

अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते ॥ १८ ॥

अयं पुरोवर्ती मुखमेव चन्द्रः मुखचन्द्रः कलङ्किनः कलङ्कसहितात् चन्द्रात्प्रसिद्धेन्दोरतिरिच्यते अतिशयितो भवति (कलङ्काभावात्)। अत्रापि मुखे चन्द्रत्वारोपो धर्ममात्रारोपपर्यवसायी भेदस्य प्रतीयमानत्वात्। कलङ्करहितत्वान्मुखचन्द्रस्योत्कर्षप्रतिपादनादधिकतादूप्यरूपकम्।

'This moon of the face excels the real moon which has a stain' is the example of अधिकतादूप्यरूपकम्। Here the distinction between the Upameya-face and Upamāna-moon, is visible. So the identification (आरोप) rests in the attribute. The विषय face is said to be superior due to the absence of stain. Therefore this is अधिकतादूप्यरूपकम् 18

अस्यैवापरमुदाहरणम्

किमसुभिर्ल्लपितैर्जड! मन्यसे मयि निमज्जतु भीमसुतामनः।
मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र दमयन्तीकृतचन्द्रोपालम्भे प्रसिद्धचन्द्रः न प्राणनिर्याणकालमनः प्रवेशार्थकश्रुतेस्तात्पर्यविषयः, किंतु नलमुखचन्द्र एवेति प्रसिद्धचन्द्रापेक्षया नलमुखचन्द्रस्याधिक्य (उत्कर्ष)प्रतिपादनादधिकताद्रूप्यरूपकम् ।

६. परिणामालङ्कारः

परिणामः क्रियार्थश्चेद्विषयी विषयात्मना ।
प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा ॥ १९ ॥

विषयी उपमानं विषयात्मना उपमेयात्मना क्रियार्थश्चेत् प्रकृतकार्योपयोगी चेत्परिणामालङ्कारः । अत्रापि रूपकवदारोपोऽस्ति । परंतु आरोप्यमाणः विषयी विषयरूपेण कार्योपयोगी भवतीति विशेषः । रूपके तु न तथेत्यनयोर्भेदः । विषयविषयिणोः स्वपदनिर्दिष्टयोरभेदप्रतिपत्तिरारोपः । मदिरेक्षणा सुन्दरलोचना तन्वी प्रसन्नेन निर्मलेन दृगेवाब्जं दृगब्जं तेन वीक्षते पश्यति इत्युदाहरणम् । अत्र दृशि लोचने अब्जत्वमारोपितं, तस्य च प्रकृतवीक्षणक्रियान्वयः स्वरूपतो न सम्भवतीत्युपमेयदृगात्मना परिणामादेव क्रियोपयोगित्वात्परिणाम इत्यन्वर्थं नाम ।

When the Upamāna, the form of which is ascribed to the Upameya, governs the predicate through the Upameya only, it is परिणामालङ्कार । Just like रूपक, there is आरोप—identification of the उपमेय with the उपमान-in परिणाम But here the उपमान with which the उपमेय has been

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

identified is not capable of governing the predicate independently and has to assume the character of the उपमेय for that purpose. This is the difference between रूपक and परिणाम. 'The girl of attractive eyes is looking (at me) with bright eyes of lotus' is the example. Here the eyes are identified with the lotus दृगब्ज but the विषयी—lotus cannot govern the predicate वीक्षते because it cannot look. Therefore it has to assume the colour of the उपमेय (eyes) to perform the act of seeing and thus it is परिणामालङ्कारः। 19

परिणामस्यापरमुदाहरणम्

तीर्त्वा भूतेशमौलिस्रजमिममरधुनीमात्मनासौ तृतीयः
तस्मै सौमित्रिमैत्रीमयमुपकृतवानातरं नाविकाय।
श्यामग्राह्यस्तनीभिः शबरयुवतिभिः कौतुकोदञ्चदक्षं
कृच्छ्रादिन्दीयमानः क्षणमचलमथो चित्रकूटं प्रतस्थे॥

अत्र सौमित्रिमैत्र्यामातरत्वमारोप्यते। स च आरोप्यमाणः आतरः आरोपविषयसौमित्रिमैत्रीरूपतापत्त्या ग्रहोपकारलक्षणकार्योपयोगी भवति न स्वात्मना, गुहस्य चेतनार्थित्वाभावात् इति परिणामालङ्कारः।

७. उल्लेखालङ्कारः - प्रथम उल्लेखः

बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते।
स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः॥ २०॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

उल्लेखो द्विविधः। नानाधर्मयोगिनः एकस्यानेकैरनेकधा उल्लेखनरूपः, एकस्यैकेनैवानेकधोल्लेखनरूपश्चेति। तत्राद्यस्य लक्षणोदाहरणे श्लोकेऽस्मिन् प्रतिपाद्येते। एकस्यानेकधर्मविशिष्टस्य बहुभिरनेकैर्ग्रहीतृभिर्बहुधा अनेकप्रकारेण उल्लेखात् विषयीकरणादुल्लेख इत्यन्वर्थनामा अलङ्कारः। सः सौन्दर्यौदार्यपराक्रमशाली राजा स्त्रीभिः कामः ऐक्षि (स्त्रीभिः मदन इति गृहीतः) अर्थिभिः स्वर्द्रुः कल्पवृक्षः ऐक्षि (कल्पवृक्ष एवेति तर्कितः), शत्रुभिः कालः अन्तकः ऐक्षि (अन्तकत्वेन दृष्टः), इत्युदाहरणम्। अत्र एक एव राजा सौन्दर्यादयनेकधर्मविशिष्टः बहुभिः स्व्यर्थिशत्रुभिः बहुधा कामुस्वर्द्रुमान्तकत्वेनोल्लिखित इति लक्षणसमन्वयः। उल्लेखेऽपि बहुत्र रूपक इवारोपोऽस्ति। किन्त्वत्र एकस्मिन् विषये ग्रहीतृभेदाद्विषयभेदाद्वा बहूनां विषयिणामारोपः, रूपके तु न तथेति भेदः।

Ullekha is of two kinds—(1) A single object conceived as different objects by different people and (2) a single object conceived as many objects by a single person. The first variety is defined and illustrated in this verse.

Where a single object (possessing many attributes) is conceived of in different ways by different persons, the Alankāra is Ullekha. He was seen as the God of love by ladies, as the Kalpaka tree by the supplicants and as the God of Death by the enemies' is the example. Here the same person, the king, is conceived as Cupid by ladies

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

because of his beauty, as Kalpaka tree by the needy people because of his generosity and as the God of death by the enemies because of his prowess. As in रूपक there is identification of the विषय with विषयी in most Ullekhās, but here one विषय is identified with many विषयिणः by different persons or by the same person with reference to different features while in रूपक it is not so. 20

अस्योल्लेखस्यापरमुदाहरणम्

गजत्रातेति वृद्धाभिः श्रीकान्त इति यौवतैः ।
यथास्थितश्च बालाभिर्दृष्टः शौरिः सकौतुकम् ॥

तत्र द्वारकां प्रविशन् कृष्णः वृद्धादिभिर्बहुभिः गजत्रातृत्वादि-रूपेण बहुधोल्लिख्यते । पूर्वोदाहरणे आरोपसद्भावाद्रूपकसङ्कीर्णत्वमत्र तु तन्नास्तीति विशेषः ।

द्वितीय उल्लेखः

एकेन बहुधोल्लेखेप्यसौविषयभेदतः ।
गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने ॥ २१ ॥

एकस्येति पूर्वश्लोकादनुषज्यते । एकस्य विषयस्य (बहुधर्म-विशिष्टस्य) एकेनैव ग्रहीत्रा विषयभेदतः बहुधा अनेकप्रकारेणोल्लेखे विषयीकरणेऽपि असौ उल्लेखालङ्कारः । अयं पुरोवर्ती राजा वचसि प्रभाषणे विषये गुरुः बृहस्पतिः महांश्च, कीर्तौ यशसि विषये अर्जुनः पार्थः धवलश्च, शरासने धनुषि विषये भीष्मः गाङ्गेयः भयङ्करश्च ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र एक एव राजा एकेनैव ग्रहीत्रा वागादिविषयभेदात् बहुधा गुरुत्वादिप्रकारैरुल्लिखित इति लक्षणसमन्वयः ।

When an object is conceived of in different ways by the same person with reference to different features, it is another variety of Ullekha. 'This king is Brihaspati (great) in speech, Arjuna (white) in fame and Bhishma (terrible) in archery' is the example. Here the king is conceived as गुरु, अर्जुन and भीष्म by the same person in respect of speech, fame and archery. 21

द्वितीयोल्लेखस्यापरमुदाहरणम्

अकृशं कुचयोः कृशं विलग्ने विपुलं चक्षुषि विस्तृतं नितम्बे ।
अधरेऽरुणमाविरस्तु चित्ते करुणाशालिकपालिभागधेयम् ।,

अत्र कपालिभागधेयत्वेनाध्यवसितं पार्वतीस्वरूपं कुचादिविषयभेदात् अकृशत्वादिबहुप्रकारेणैकेनैव ग्रहीत्रा विषयीकृतमिति द्वितीयः उल्लेखः ।

८-९-१० स्मृति - भ्रान्ति - सन्देहालङ्काराः

स्यात्स्मृति भ्रान्तिसन्देहैस्तदङ्कालङ्कृतित्रयम् ।

स्मृतिभ्रान्तिसन्देहैः 'सादृश्यान्निबध्यमानैः तदङ्कालङ्कृतित्रयं स्मृतिभ्रान्तिसन्देहपदाङ्कितालङ्कारत्रयं स्यात्, क्रमेण स्मृतिमान्, भ्रान्तिमान्, सन्देह इति त्रयः अलङ्कारा भवन्ति इत्यर्थः । स्मृतित्वं, भ्रान्तित्वं, सन्देहत्वं न तेषां क्रमेण लक्षणम् । सादृश्यमूलानामेव

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्मृत्यादीनां चमत्कारित्वादलङ्कारत्वं सिध्येत्। स्मृतित्वं च 'स्मरामि' इत्यनुभवसाक्षिको जातिविशेषः। विशेष्यावृत्तिप्रकारकज्ञानत्वं भ्रमत्वम्। एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञानत्वं सन्देहत्वम्। तथा च (१) कविसम्मतसादृश्यात् विषयविषयिणोरन्यतदर्शनेनान्यतरस्मृतिवर्णने स्मृतिमदलङ्कारः, (२) विषये मुखादौ विषयिपद्मादिभ्रमवर्णने भ्रान्तिमदलङ्कारः, (३) सदृशयोर्विषयविषयिणोर्विशेषादर्शनात्सन्देहवर्णने सन्देहालङ्कार इति फलितोऽर्थः।

By the description of स्मृति (remembrance), भ्रान्ति (illusion) and सन्देह (doubt), we have three figures of speech marked by those words— स्मृतिमान्, भ्रान्तिमान् and सन्देहः। They become Alankaras only when स्मृति, भ्रान्ति and सन्देह are based on सादृश्य (similarity.) Thus (1) when the sight of an object rouses the memory of a similar object, the figure is स्मृतिमान् (2) Where the sight of a object creates an illusion owing to similarity, there the figure is भ्रान्तिमान्। (3) Where the sight of an object causes a doubt owing to similarity, the figure is सन्देहः।

स्मृतिमदलङ्कारस्योदाहरणम्

पङ्कजं पश्यतः कान्तामुखं मे गाहते मनः ॥ २२ ॥

पङ्कजं पश्यतो मम मनः कान्तायाः मुखं गाहते स्मरतीत्यत्र पङ्कजदर्शनेन तत्सदृशकान्तामुखस्मृतिवर्णनात् स्मृतिमदलङ्कारः

'When I see the lotus my mind recalls the face of my beloved' is the example of स्मृतिमदलङ्कार। Here the sight

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata, Digitization: eGangotri.

of the lotus rouses the memory of the similar object—the face of the beloved.

अस्यैवापरमुदाहरणम्

दिव्यानामपि कृतविस्मयां पुरस्तात्
अम्भस्तः स्फुरदरविन्दचारुहस्ताम्।
उद्वीक्ष्य श्रियमिव कांचिदुत्तरन्तीं
अस्मार्षीज्जलनिधिमन्थनस्य शौरिः॥

जलक्रीडायामम्भसः निर्गच्छन्तीं कांचित्सुन्दरीं पश्यतः कृष्णस्य सदृशलक्ष्मीस्मृतिपूर्वकं तत्सम्बन्धिनो जलनिधिमन्थनस्यापि स्मृतिरत्र वर्णितेति पूर्वोदाहरणाद्विशेषः।

भ्रान्तिमदलङ्कारस्योदाहरणम्

अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पङ्कजम्।

अयं प्रमत्तो मदपरवशः मधुपः द्विरेफः तव मुखं पङ्कजं वेत्ति जानाति, तव मुखे पङ्कजत्वबुद्धिं करोति इति सादृश्येन हेतुना पङ्कजत्वाभाववति मुखे पङ्कजत्वप्रकारकज्ञानवर्णनात् भ्रान्तिमदलङ्कारः।

'This intoxicated bee thinks your face to be a lotus' Here, on account of similarity, the sight of the face creates the illusion of the lotus in the bee and hence this is an example of भ्रान्तिमदलङ्कार।

अस्यैवापरमुदाहरणम्

पलाशकुसुमभ्रान्त्या शुकतुण्डे पतत्यलिः।
सोऽपि जम्बूफलभ्रान्त्या तमलिं घतुंमिच्छति॥

K—3

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

अत्र भ्रामरस्य शुकतुण्डे पलाशपुष्पभ्रान्तिः, शुकस्य च भ्रमरे जम्बूफलभ्रान्तिरिति परस्परभ्रान्तिवर्णनं विशेषः ।

सन्देहालङ्कारस्योदाहरणम्

पङ्कजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः ॥ २३ ॥

मुखं पङ्कजं वा दृष्ट्वा एवं सन्दिह्यते—इदं पङ्कजं वा, अथवा सुधांशुश्चन्द्र इत्यस्माकं न निर्णय इति, अत्र पङ्कजत्वसुधांशुत्वोभयकोटिकज्ञानं सादृश्यमूलकमिति सन्देहालङ्कारः । निर्णयभिन्नसम्भावनाभिन्नज्ञानत्वं सन्देहत्वमित्यालङ्कारिकाणां मतम् ।

'Whether it is a lotus or the moon, we are unable to decide' is an example of सन्देहालङ्कार। Here, on seeing a face or a lotus, a doubt is roused on account of similarity whether it is a lotus or the moon.

अस्यैवापरमुदाहरणम्

जीवनग्रहणे नम्राः गृहीत्वा पुनरुन्नताः ।
किं कनिष्ठाः किमु ज्येष्ठाः घटीयन्त्रस्य दुर्जनाः ॥

अत्र दुर्जनाः घटीयन्त्रस्य ज्येष्ठा वा कनिष्ठा वेति कल्पितकोटिकः सन्देहः, पूर्वोदाहरणे तु प्रसिद्धकोटिक इति भेदः ।

११. अपह्नुत्यलङ्कारः

अपह्नुतिः निषेधः, स च सादृश्यमूलकाभेदप्रतिपत्तिपूर्वकः अलङ्कारः । अपह्नुतिः षड्विधा - (१) शुद्धापह्नुतिः (२) हेत्वपह्नुतिः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(३) पर्यस्तापह्नुतिः (४) भ्रान्तापह्नुतिः (५) छेकापह्नुतिः (६) कैतवापह्नुतिश्चेति। एतेषां क्रमेण लक्षणोदाहरणानि प्रदर्श्यन्ते।

Apahnuti means denial or concealment. Such a denial, either for or due to the identification of two things is an Alankāra when based on similarity. There are six kinds of अपह्नुति—1. शुद्धापह्नुतिः 2. हेत्वपह्नुतिः 3. पर्यस्तापह्नुतिः 4. भ्रान्तापह्नुतिः 5. छेकापह्नुतिः and 6. कैतवापह्नुतिः। They are defined and illustrated in the same order.

(१) शुद्धापह्नुतिः

शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः।
नायं सुधांशुः, किं तर्हि? व्योमगङ्गासरोरुहम्॥ २४॥

अन्यस्य अप्रकृतधर्मस्य आरोपार्थः आरोपफलकः धर्मनिह्नवः वर्णनीयधर्मनिषेधः शुद्धापह्नुतिः। उपमेये उपमानधर्मारोपफलकः उपमेयधर्मनिषेधः शुद्धापह्नुतिरिति निष्कर्षः। अयमाकाशे दृश्यमानः न सुधांशुश्चन्द्रः, किं तु व्योमगङ्गासरोरुहम् इत्युदाहरणम्। अत्र वर्णनीये चन्द्रे तत्सदृशाकाशगङ्गासरोरुहत्वारोपात् तदीयचन्द्रत्वनिषेधकृत इति शुद्धापह्नुतिः। रूपकवदत्राप्यारोपोऽस्ति, किंतु रूपके प्रकृतधर्मनिषेधो नास्तीति भेदः।

The denial of the real character of the उपमेय in order to attribute the character of the उपमान is शुद्धापह्नुतिः, 'The object seen yonder is not the moon, it is the lotus

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

of the heavenly ganges' is the example. Here the real character of the moon 'सुधांशुत्व' is denied in order to attribute the character of the lotus of आकाशगङ्गा. Both in Rupaka and in Apahnuti there is आरोप (fictitious assumption) but there is no express denial of the truth in Rupaka.

शुद्धापह्नुतेरपरमुदाहरणम्

अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च संजगदिरे भूच्छायमैच्छन् परे।
इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते
तत्सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे॥

अत्र इन्दौ दृश्यमाने श्यामवस्तुनि अन्धकारत्वारोपार्थं न केवलं स्वाभाविकस्य, किन्तु परैरुत्प्रेक्षितानामपि धर्माणामपह्नवः[1] कृत इति विशेषः। एकत्रानेकापह्नवरूपमपि वैचित्र्यमत्रास्ति। अङ्कत्व-पङ्कत्वादीनां परमतत्वेनोपन्यासात् निषेधः अर्थसिद्धः।

(२) हेत्वपह्नुतिः

स एव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिः।
नेन्दुस्तीव्रो, न निश्यर्कः, सिन्धोरौर्वोऽयमुत्थितः॥२५॥

स एव अन्यस्यारोपार्थः प्रकृतधर्मापह्नव एव युक्तिपूर्वश्चेत् सहेतुको यदि क्रियते तर्हि हेत्वपह्नुतिः। यत्र अप्रकृतारोपफलके प्रकृतधर्मनिषेधे हेतुरपि निर्दिश्यते तत्र हेत्वपह्नुतिरिति निष्कर्षः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अयमाकाशे दृश्यमानो नेन्दुः, चन्द्रो न, (यस्मात्) तीव्रः अत्युष्णः, सूर्योऽपि न, निशि रात्रौ (दृश्यमानत्वात्), सिन्धोः समुद्रात् और्वः बडवाग्निरयमुत्थितः इत्युदाहरणम्। अत्र चन्द्रत्वस्य सूर्यत्वस्य च निषेधे तीक्ष्णत्वम् निशि दृश्यमानत्वं च क्रमेण हेतू निर्दिष्टौ। निषेधश्च प्रकृते चन्द्रे और्वत्वारोपार्थ इति लक्षणसङ्गतिः। विरहिणीवचनत्वाच्चन्द्रे तीव्रत्वोक्तिरुपपद्यते।

If the denial of the real character of the उपमेय for ascribing the character of the उपमान is supported by (express) reason it is हेत्वपह्नुतिः। 'The object seen yonder is not the moon (because) it is hot, it is not the sun (because the sun will not rise) at night; it is the submarine fire risen from the ocean' is the example. These are the words of a lover in separation and hence the moon is spoken as hot. Here, heat and appearance at night are expressed as reasons for negativing the character of the moon and sun and ascribing the character of the submarine fire. 25

अस्या एवापरमुदाहरणम्

मन्थानभूमिधरमूलशिलासहस्र-
सङ्घट्टनव्रणकिणः स्फुरतीन्दुमध्ये।
छाया मृगः शशक इत्यतिपामरोक्तिः
तेषां कथञ्चिदपि तत्र हि न प्रसक्तिः॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र चन्द्रे समुद्रमथनकाले मन्दरपर्वतस्य शिलासंघट्टनेन कृतव्रणकिणस्यैव प्रसक्तिः न पुनः छायादीनामिति तेषामपह्नवः पामरवचनोपन्यासेन आविष्कृतः। छायाशब्देनात्र भूच्छाया विवक्ष्यते।

(३) पर्यस्तापह्नुतिः

अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सः।
नायं सुधांशुः, किं तर्हि? सुधांशुः प्रेयसीमुखम्॥२६॥

यत्र सः, क्वचिद्धस्तुनि तदीयधर्मनिह्नवः, अन्यत्र वर्णनीये वस्तुनि तस्य धर्मस्यारोपार्थः तत्र पर्यस्तापह्नुतिः। पर्यस्ता आरोप-व्यधिकरणा अपह्नुतिर्निषेध इति पर्यस्तापह्नुतिरन्वर्थसंज्ञा। अयं पुरो-दृश्यमानः न सुधांशुः, चन्द्रो न, किन्तु प्रेयसीमुखं सुधांशुरित्युदा-हरणम्। अत्र चन्द्रे सुधांशुत्वनिषेधः अन्यत्र वर्णनीये प्रेयसीमुखे तस्य सुधांशुत्वस्य अरोपार्थ इति लक्षणसमन्वयः।

[चन्द्रे चन्द्रत्वनिषेधस्य साक्षात् मुखे तदारोपार्थत्वं यद्यपि नास्ति तथापि आरोपदार्ढ्यसंपादकत्वस्यानुभवसिद्धत्वात्तदर्थत्वोक्तिः]

Where the denial of the character of one object is for attributing that character to another (relevant) object, it is पर्यस्तापह्नुतिः। पर्यस्त means shifted to another place. The character which is denied in one place is shifted to another place and hence the name. 'The object seen yonder is not the moon, the face of the beloved is the moon, is the example. Here the character of the moon

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपह्नुत्यलङ्कारः

is denied in the real moon in order to shift it (attribute it) to the face of the beloved.

अस्या अपरमुदाहरणम्

हालाहलो नैव विषं, विषं रमा
जना परं व्यत्यसमत्र मन्वते।
निपीय जागर्ति सुखेन तं शिवः
स्पृशन्निमां मुह्यति निद्रया हरिः॥

अत्र हालाहले विषत्वनिषेधः रमायां तत्त्वारोपार्थः। उत्तरार्धे हेतुरप्युक्त इति पूर्वोदाहरणाद्विशेषः। तथा च पर्यस्तापह्नुतेरपि हेतोरुक्त्या उक्त्या च द्वैविध्यं बोध्यम्।

(४) भ्रान्तापह्नुतिः

भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे।
तापं करोति सोत्कम्पं, ज्वरः किं? न, सखि! स्मरः॥

अन्यस्य प्रकृतेतरस्य अतत्वस्य शङ्कायां सत्यां, भ्रमे सति इत्यर्थः, भ्रान्तेः भ्रमस्य वारणे तत्त्वाख्यानेन निवर्तने भ्रमविषयनिषेधात् भ्रान्तापह्नुतिः। तत्त्वकथनहेतुकभ्रान्तिविषयनिषेध इति निष्कर्षः। मदनपीडिता नायिका वदति स्मरं मनसि कृत्वा 'सोत्कम्पं तापं करोति' इति। कम्पस्य तापस्य च ज्वरसाधारण्यात् ऋजुबुद्धिः सखी शङ्कते 'किं ज्वरः'? इति। नायिका 'न ज्वरः' किन्तु स्मरः' इति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तत्त्वकथनपूर्वकं भ्रमविषयं ज्वरं निषिध्य सख्याः भ्रमं वारयतिं। तदेवं 'तापं करोति—' इत्यादि श्लोकार्धं भ्रान्तापह्नुतेरुदाहरणम्। सादृश्याद्भ्रमे भ्रान्तिमदलङ्कारः। ततः तन्निषेधे भ्रान्तापह्नुतिः।

When a doubt (illusion) is expressed by a person and it is cleared by another telling the truth, it is भ्रान्तापह्नुतिः। 'Is it fever that causes heat accompanied by shivering in you? No friend, it is Cupid (God of love).' is the example. Here a woman tormented by love says 'It causes tempárature and shivering'. Since these are common symptoms of fever also, the friend enquires whether it is fever. The woman clears the doubt (illusion of fever) of the friend by telling the truth that it is Cupid. When an illusion is caused by similarity it is भ्रान्तिमदलङ्कारः। When that illusion is cleared by telling the truth it is भ्रान्तापह्नुतिः। 27

अस्याः अपरमुदाहरणम्

नागरिक समधिकोन्नतिरिह महिषः कोऽयमुभयतः पुच्छः।
नहि नहि करिकलभोऽयं शुण्डादण्डोऽयमस्य न तु पुच्छम्॥

अत्र करिकलभे महिषभ्रान्तिर्निश्चयरूपा। ज्वरः किं' इति पूर्वोदाहरणे सन्देहरूपेति विशेषः। अपि च ग्रामीणस्य गजकलभे महिषभ्रान्तिः, शुण्डादण्डे पुच्छभ्रान्तिश्च नागरिकेण तत्त्वाख्यानपूर्वकं वार्यते इति भ्रान्तापह्नुतिः।

CC-0. Bhagavan Ramanuja National Research Institute. Melukote Collection.

CC-0. Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(५) छेकापह्नुतिः

छेकापह्नुतिरन्यस्य शङ्कातस्तथ्यनिह्नवे ।
प्रजल्पन्मत्पदे लग्नः, कान्तः किं ? न हि, नूपुरः ॥२८॥

अन्यस्य अनुद्दिष्टस्य श्रोतृजनस्य शङ्कातः (हेतौ तसिः) शङ्काहेतोः (तात्विकवस्तुशङ्कया) तन्निवारणार्थं तथ्यस्य यथार्थस्याभिप्रेतार्थस्य निह्नवे निषेधे छेकापह्नुतिः। छेको विदग्धः, तत्कृता अपह्नुतिः छेकापह्नुतिरिति लक्ष्यनिर्देशः। वाक्यस्यान्यथायोजनेन शङ्कितताविकवस्तुनिषेध इति लक्षणम्। 'प्रजल्पन् मत्पदे लग्न :— इत्याद्युदाहरणम्। काचिन्नायिका स्वकान्तं मनसि निधाय आप्तसखीं वदति—प्रजल्पन् यत्किमपि, (मामनुनेतुम्) प्रलपन् मत्पदे मम चरणे, लग्नः प्रणतः इति। अन्यापि काचिद्यदृच्छया तद्वाक्यं श्रुत्वा शङ्किततत्वार्था पृच्छति 'कान्तः किम्'? इति। तदा विदग्धा नायिका तथ्यगोपनाय प्रतिवदति—न हि कान्तः, किंतु नूपुर इति। अत्र नूपुर एव शब्दायमानः पादे लग्न इति वाक्यस्यान्यथायोजनेन शङ्कितताविकवस्तुनः कान्तस्य निषेधः वैदग्ध्येन कृत इति लक्षणसमन्वयः।

छेक means a clever person. When the truth of a statement is suspected by another and it is denied by the clever speaker in order to conceal the truth, it is छेकापह्नुतिः। 'Chattering something, he clung to my foot.' Is it your lover?' 'No, the anklet' is the example. The heroine

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

was telling her confidential friend that the hero clung te her foot prattling something. Another person who overheard a portion of the conversation suspected the truth and asked—'Was it your lover?' Now the clever heroine hides the truth saying that it was not her lover but only the anklet that clung to her feet jingling. Here the suspected truth is denied by giving a different interpretation to the statement made. That shows the cleverness of the heroine and hence छेकापह्नुतिः। 28

अस्या एवापरमुदाहरणम्

सीत्कारं शिक्षयति व्रणय-
त्यधरं तनोति रोमाञ्चम्।
नागरिकः किं मिलितो?
नहि नहि, सखि! हैमनः पवनः॥

अत्र सीत्कारं शिक्षयति इत्यादिवाक्यार्थं नागरिकाभिप्रायेण प्रियसखीं प्रति कयाचिदुक्तमाकर्ण्यान्यया तत्वार्थः शङ्कितः। तां प्रति तच्छङ्कानिवृत्तये वाक्यस्य हैमन्तिकपवनपरत्ववर्णनेन तात्विकस्य नागरिकस्यापह्नवः कृतः।

(६) कैतवापह्नुतिः

कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः पदैः।
निर्यान्ति स्मरनाराचाः कान्ताहृक्पातकैतवात्॥ २९॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

व्याजाद्यैः व्याजछलकैतवप्रभृतिभिः पदैः निह्नुतेः निषेधस्य व्यक्तौ स्फुटीकरणे कैतवापह्नुतिः। अत्र कण्ठतो धर्मनिषेधो नत्रा न क्रियते, किन्तु असत्यत्वाभिधायिभिः कैतवादिपदैर्निषेधः प्रतीयते। कान्तायाः दृक्पातकैतवात् दृष्टिप्रसरव्याजेन स्मरनाराचाः तन्मथबाणविशेषाः निर्यान्ति निर्गच्छन्ति इत्युदाहरणम्। अत्र कैतवपदेन 'नेमे कान्ताकटाक्षाः किन्तु स्मरनाराचाः' इत्यपह्नवः प्रतीयते।

When the denial is conveyed by the use of phrases like 'under the pretext (guise) of' व्याज, कैतव, छल etc., it is कैतवापह्नुतिः। 'The arrows of Cupid emerge under the pretext of the beloved's glances' is the example. Here the character of Cupid's arrows is attributed to the beloved's glances and the denial of the real character is conveyed by the word कैतव। It means—'they are not the glances of the beloved, but are the arrows of Cupid'. 29

अस्याः अन्यदुदाहरणम्

रिक्तेषु वारिकथया विपिनोदरेषु
मध्याह्नजृम्भितमहातपतापतप्ताः।
स्कन्धान्तसेस्थितदवाग्निशिखाच्छलेन
जिह्वां प्रसार्य तरवो जलमर्थयन्ते॥

अत्र दवाग्निशिखाव्याजेन ग्रीष्मतप्तास्तरवः जलं प्रार्थयन्ते इत्यनेन 'नेमाः दवाग्निशिखाः, किन्तु तरूणां जिह्वा इति छलपदात् प्रतीयते।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(१२) उत्प्रेक्षालङ्कारः

संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।
उक्तानुक्तास्पदाद्यात्र सिद्धाऽसिद्धास्पदे परे ॥ ३० ॥

संभावना उत्प्रेक्षा स्यात्। उत्प्रेक्षा इति लक्ष्यनिर्देशः। संभावना इति लक्षणम्। निश्चयभिन्नं सन्देहभिन्नं च ज्ञानं संभावना, उत्कटैकतरकोटिकः संशयः सम्भावनेति केचित्। अन्यधर्मसंबन्धेन निमित्तेन अन्यस्य अन्यतादात्म्यसंभावनं उत्प्रेक्षा इति निष्कर्षः। उत्प्रेक्षा त्रिविधा—(1) वस्तु अथवा स्वरूपोत्प्रेक्षा, (2) हेतूत्प्रेक्षा, (3) फलोत्प्रेक्षा इति। वस्तुनः कस्यचिद्वस्त्वन्तरतादात्म्यसंभावना वस्तूत्प्रेक्षा। वस्तुत्वं च हेतुत्वेन फलत्वेन वा विवक्षितात् भिन्नत्वम्। अहेतोः हेतुभावेन संभावना हेतूत्प्रेक्षा। अफलस्य फलत्वेन संभावना फलोत्प्रेक्षा। अत्र त्रिविधायामुत्प्रेक्षायां आद्या वस्तूत्प्रेक्षा उक्तास्पदा उक्तविषया, अनुक्तास्पदा अनुक्तविषया, इति द्विविधा। परे हेतुफलोत्प्रेक्षे सिद्धविषया, असिद्धविषया चेति प्रत्येकं द्विविधे। तथाच षड्विधा उत्प्रेक्षा। (1) उक्तविषया वस्तूत्प्रेक्षा (2) अनुक्तविषया वस्तूत्प्रेक्षा (3) सिद्धविषया हेतूत्प्रेक्षा (4) असिद्धविषया हेतूत्प्रेक्षा। (5) सिद्धविषया फलोत्प्रेक्षा (6) असिद्धविषया फलोत्प्रेक्षा। एतेषां क्रमेणोदाहरणानि दीयन्ते।

Utpreksha is poetic fancy (सम्भावना). An accurate definition of उत्प्रेक्षा is "अन्यधर्मसंबन्धेन अन्यस्यान्यतादात्म्यसंभावनम्"—Where an object is poetically fancied as a

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

different thing due to the presence of some common trait it is उत्प्रेक्षालङ्कारः। It is of three kinds—वस्तु or स्वरूपोत्प्रेक्षा (2) हेतूत्प्रेक्षा and (3) फलोत्प्रेक्षा. When a thing which is not of a particular character is conceived as one of that character, it is वस्तूत्प्रेक्षा. When something which is not the real cause is fancied as the cause, it is हेतूत्प्रेक्षा. When a thing which is not the real purpose or result is fancied as such, it is फलोत्प्रेक्षा। वस्तूत्प्रेक्षा is again divided into two types—उक्तविषया - where the relevant object is mentioned and अनुक्तविषया—where the relevant object is not mentioned. हेतु and फलोत्प्रेक्षा also are each divided into two types—सिद्धविषया—where the object (विषय) of the fancied cause or result has reality or probability, and असिद्धविषया—where the object of the fancied cause or result has no reality or probability even. Thus उत्प्रेक्षा is of six kinds—

(1) उक्तविषया वस्तूत्प्रेक्षा (2) अनुक्तविषया वस्तूत्प्रेक्षा
(3) सिद्धविषया हेतूत्प्रेक्षा (4) असिद्धविषया हेतूत्प्रेक्षा
(5) सिद्धविषया फलोत्प्रेक्षा (6) असिद्धविषया फलोत्प्रेक्षा।

These are illustrated in the same order.

(१) उक्तविषया वस्तूत्प्रेक्षा

धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम्।

अहं तमः अन्धकारं कोकीनां चक्रवाकाङ्गनानां विरहशुष्मणां विरहाग्नीनां धूमस्तोमं धूमपटलं शङ्के तर्कयामि, इत्यत्र रात्रौ प्रवर्ध-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मानमन्धकारात्मकं वस्तु कोकीविरहाग्नीनां धूमपटलत्वेन वस्त्वात्मना उत्प्रेक्ष्यते। अत्र च निमित्तं नीलत्वदृष्टिप्रतिरोधकत्वादिधर्मसंबन्धः। तमः धूमस्तोमं शङ्के इति तमसो विषयस्योक्तत्वादुक्तविषया वस्तूत्प्रेक्षा। शङ्के इत्युत्प्रेक्षाद्योतकः शब्दः। एवं मन्ये, ध्रुवम्, प्रायः, नूनम्, इव इत्यादयोऽपि उत्प्रेक्षाद्योतकाः ज्ञातव्याः।

'I fancy the darkness (at night) as the column of smoke from the fire of separation of the female Chakravaka birds' is the example of उक्तविषया वस्तूत्प्रेक्षा। Here darkness, an object (वस्तु) is mentioned (उक्त) and is fancied as another object—column of smoke. Black colour and causing obstruction to the eyes are the common traits on which this fancy (संभावना) is based. शङ्के, मन्ये, ध्रुवं, प्रायः, नूनं, and इव etc. denote उत्प्रेक्षा.

अस्या एवापरमुदाहरणम्

बालेन्दुवक्राण्यविकासभावाद्बभुः पलाशान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्॥

अत्र पलाशकुसुमानां वक्रत्वलोहितत्वादिधर्मसंबन्धेन सद्यः कृतनखक्षततादात्म्यसम्भावनात्, विषयस्य पलाशकुसुमानामुपादानाच्च उक्तविषया वस्तूत्प्रेक्षा।

(२) अनुक्तविषया वस्तूत्प्रेक्षा

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ॥ ३१ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तमः अन्धकारः अङ्गानि लिम्पति इव-अङ्गानां लेपनं करोतीव इत्येकमुदाहरणम्। नभः आकाशः अञ्जनं वर्षतीव इत्यपरमुदाहरणम्। उभयत्रापि तमसः व्यापनं विषयः, स च नोक्तः। तस्य च तमोव्यापनस्य सकलवस्तुसान्द्रमलिनीकरणेन निमित्तेन 'तमःकर्तृकलेपनतादात्म्यं, नभः कर्तृकाञ्जनवर्षणतादात्म्यं च उत्प्रेक्ष्येते इति अनुक्तविषया (वस्तु) स्वरूपोत्प्रेक्षा। अत्र इवशब्दः संभावनाद्योतकः।

'Darkness seems to anoint the limbs', and the sky seems to shower collyrium', are two examples of अनुक्तविषया वस्तूत्प्रेक्षा। The darkness is spreading making everything dark. That spreading of darkness is fancied as the anointing of the limbs by darkness and the shower of अञ्जन by the sky. The विषय—spreading (of darkness) is not mentioned and the वस्तु—व्यापनं is fancied as another वस्तु—लेपनम् or वर्षणम् 31

अस्या एवापरमुदाहरणम्

पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम्।
तदादाय करैरिन्दुः लिम्पतीव दिगङ्गनाः॥

अत्र तरङ्गाग्रैः फेनचन्दनस्य प्रेरणं पेषणत्वेनोत्प्रेक्ष्यते। समुद्रादुत्थितस्य चन्द्रस्य किरणानां दिक्षु व्याप्तं फेनचन्दनकृतलेपनत्वेनोत्प्रेक्ष्यते। पूर्वत्र समुद्रोपान्ते फेनपुञ्जीभवनं निमित्तम्। उत्तरत्र दिशां धवलीकरणं निमित्तम्, प्रेरणव्यापनयोः विषययोरनुपादानादनुक्तविषया वस्तूत्प्रेक्षा.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(३) सिद्धविषया हेतूत्प्रेक्षा

रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद् ध्रुवम्।

तव मृदुलौ अङ्घ्री चरणौ भुवि विक्षेपणात् सञ्चारात् हेतोः रक्तौ लोहितौ ध्रुवम्, इत्यत्र भुवि विक्षेपणं पादयोः रक्तत्वस्य हेतुत्वेनोत्प्रेक्ष्यते। पादयोः रक्तत्वस्य स्वतः सिद्धत्वाद् विक्षेपणं न हेतुः, तथापि तस्य हेतुत्वसम्भावनात् हेतूत्प्रेक्षा। अत्र विक्षेपणं विषयः, स च सिद्धः, तस्मिन् हेतुत्वं हेतुतादात्म्यं उत्प्रेक्ष्यत इति सिद्धविषया हेतूत्प्रेक्षा।

'Surely your soft feet are red owing to their stamping on the ground' is the example of सिद्धविषया हेतूत्प्रेक्षा। The feet are red by nature, but walking on the hard surface of the ground is fancied as the cause of redness, though it is not the real cause, Here walking is the विषय on which हेतुत्व is fancied. The विषय exists and hence सिद्धविषया हेतूत्प्रेक्षा.

अस्या एवापरमुदाहरणम्

रात्रौ रवेर्दिवा चेन्दोरभावादिव स प्रभुः।
भूमौ प्रतापयशसी सृष्टवान् सततोदिते॥

अत्र प्रतापयशसोः सृष्टौ रात्रौ सूर्याभावः, दिवा चन्द्राभावश्च स्वतः सिद्धौ हेतुत्वेनोत्प्रेक्षिताविति सिद्धविषया हेतूत्प्रेक्षा।

(४) असिद्धविषया हेतूत्प्रेक्षा

त्वन्मुखामेच्छया नूनं पद्मैर्वैरायते शशी॥ ३२॥

CC-0. Bhagavad Ramanuja National Research Institute. Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शशी चन्द्रः तव मुखस्य या आभा सौन्दर्यं तल्लिप्सया पद्मैः सह वैरं करोति इत्यत्र चन्द्रपद्मयोः विरोधे स्वाभाविकेऽपि तन्वीमुख-कान्तिलाभेच्छा हेतुत्वेन उत्प्रेक्ष्यते। चन्द्रस्य कान्तामुखकान्ति-लिप्सायाः अप्रसिद्धत्वात् (असत्त्वात्) असिद्धविषया हेतूत्प्रेक्षा।

'Surely, the moon bears enmity with lotuses owing to the desire to attain the beauty of your face'. The moon is the enemy of the lotuses by nature, but the desire to attain the beauty of the lady's face is fancied as the cause of that enmity. Such a desire on the part of the moon in unreal and improbable and hence this is an example of असिद्धविषया हेतूत्प्रेक्षा। 32

अस्या अपरमुदाहरणम्

विवस्वतानायिषतेव मिश्राः
स्वगोसहस्रेण समं जनानाम्।
गावोऽपि नेत्रापरनामधेया-
स्तेनेदमान्ध्यं खलु नान्धकारैः॥

विवस्वता सूर्येण स्वकिरणैः सह मिश्रिताः जनानां नेत्रापर-नामधेया गावोऽपि अनायिषत नीता इव तेन नयनेन इदमान्ध्यं, न तु अन्धकारैः इत्यत्र सूर्येण जनानां नेत्रनयनमसिद्धं रात्रौ अन्धतायाः हेतुत्वेनोप्रेक्ष्यते, तस्मादसिद्धविषया हेतूत्प्रेक्षा।

CC-0. Bhagavad Ramanuja National Research Institute. Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(५) सिद्धविषया फलोत्प्रेक्षा

मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः ।

हे कान्ते ! मध्यः अवलग्नभागः कुचयोः धृत्यै धारणाय कनकदामभिः बद्धः किम् ? इत्यत्र कनकदामबन्धत्वेनाध्यवसितस्य वलित्रयवेष्टनस्य कुचधारणार्थत्वमुत्प्रेक्ष्यते । मध्यः स्वयमेव कुचौ धरति, न तु कनकदामबन्धत्वेनाध्यवसितवलित्रयवेष्टनबलात् । तथा च कुचधारणं कनकदामबन्धस्य फलत्वेनोत्प्रेक्षितमिति फलोत्प्रेक्षा । कुचधारणस्य सिद्धत्वाच्च सिद्धविषया ।

'The waist is tied up with golden threads as if to hold the breasts.' Here the three folds of the skin (which are a mark of beauty) are identified (अध्यवसित) as golden threads tied round the waist and the holding of the breasts is fancied as the purpose (फल) of tying the golden threads round the waist. Since the holding of the breasts is a reality, this is an example of सिद्धविषया फलोत्प्रेक्षा.

अस्या एवान्यदुदाहरणम्

पूरं विधुर्वर्धयितुं पयोधेः शङ्केऽयमेणाङ्कमणिं कियन्ति ।
पयांसि दोग्धि प्रियविप्रयोगे सशोककोकीनयने कियन्ति ॥

चन्द्रोदये समुद्रबृंहणं स्वतः सिद्धम् । तथापि समुद्रं वर्धयितुं चन्द्रः चन्द्रकान्तमणिं द्रावयति, कोकीनयनेभ्यः अश्रूणि पातयतीति समुद्रवर्धनं चन्द्रकान्तद्रावणस्य कोकाङ्गनाबाष्पस्रावणस्य च फलत्वेन उत्प्रेक्ष्यत इति सिद्धविषया फलोत्प्रेक्षा ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(६) असिद्धविषया फलोत्प्रेक्षा

प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति ॥ ३३ ॥

अत्र पद्मस्य जले अवस्थानं जलवासतपस्त्वेनाध्यवस्य तत्तपसः फलमुत्प्रेक्ष्यते। हे कान्ते! प्रायः अब्जं तव पदेन पादेन ऐक्यं प्राप्तुं तोये तपस्यति उदवासतपःकरोति इत्यत्र पद्मस्य जले स्वाभाविकमवस्थानं तपस्त्वेनाध्यवसितं कामिनीपादसायुज्यप्राप्त्यर्थमिति पदसायुज्यप्राप्तेः उदवासतपःफलत्वमुत्प्रेक्ष्यते। कामिनीचरणसायुज्यप्राप्तेश्च असिद्धत्वेन असिद्धविषया फलोत्प्रेक्षा।

'The lotus is doing penance in the water as if to attain union with your foot'. Here the presence of the lotus in water is identified (अध्यवसित) with its penance. The attainment of union (equality) with the foot of the lady is fancied as the fruit of that penance. Since the attainment of union with the foot is unreal and quite improbable, this is an example of असिद्धविषया फलोत्प्रेक्षा। 33

अस्या एवापरमुदाहरणम्

रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम्।
उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्याम्॥

अत्र सूर्यस्योत्तरदिग्गमनस्य रथस्थितपुरातनाश्वपरिवर्तनं फलत्वेनोत्प्रेक्ष्यते। अश्वपरिवर्तनस्य चासिद्धत्वात् असिद्धविषया फलोत्प्रेक्षा।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

१३. अतिशयोक्त्यलङ्कारः

अतिशयस्य लोकमर्यादातिवर्तिनः (कविसम्मतस्य) विशेषस्य उक्तिः अतिशयोक्तिः इति नाम्नैव अस्यालङ्कारस्य सामान्यलक्षणमुक्तं भवति। तथा च दण्डी—

"विवक्षा या विशेषस्य लोकसीमातिवर्तिनी।
असावतिशयोक्तिः स्यात्" इति।

अतिशयोक्तिरष्टविधा (१) रूपकातिशयोक्तिः, (२) सापह्नव-रूपकातिशयोक्तिः, (३) भेदकातिशयोक्तिः, (४) संबन्धातिशयोक्तिः, (५) असंबन्धातिशयोक्तिः, (६) अक्रमातिशयोक्तिः, (७) चपलातिशयोक्तिः, (८) अत्यन्तातिशयोक्तिः, इति। एतेषां क्रमेण लक्षणोदाहरणानि दीयन्ते।

When a speciality far exceeding the usual limits of propriety is expressed, it is अतिशयोक्तिः (अतिशयस्य लोकसीमातिवर्तिनो विशेषस्य उक्तिः)। The fundamental principle of अतिशयोक्ति (Hyperbole) is exaggeration. Eight kinds of अतिशयोक्ति are defined and illustrated here. They are (1) रूपकातिशयोक्तिः, (2) सापह्नवरूपकातिशयोक्तिः, (3) भेदकातिशयोक्तिः, (4) संबन्धातिशयोक्तिः, (5) असंबन्धातिशयोक्तिः, (6) अक्रमातिशयोक्तिः, (7) चपलातिशयोक्तिः and (8) अत्यन्तातिशयोक्तिः।

(१) रूपकातिशयोक्तिः

रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः।
पश्य नीलोत्पलद्वन्द्वान्निस्सरन्ति शिताः शराः॥ ३४॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

निगीर्य, विषयस्य स्वशब्देनोपादानं विना विषयिवाचकपदेनैव ग्रहणं कृत्वा, अध्यवसानतः विषयस्य विषयिरूपेण आहार्यनिश्चयात् अतिशयोक्तिः स्यात्। आहार्यत्वं नाम बाधकालीनेच्छाजन्यत्वम्। यत्रोपमेयं मुखादिकं तद्वाचिमुखादिपदेन अनुपादाय उपमानवाचिचन्द्रादिपदैरेवोपादाय चन्द्रादिरूपेण (चन्द्राद्यभेदतादृप्यान्यतररूपेण) अवधार्यते तत्र रूपकातिशयोक्तिरिति निष्कर्षः। हे सखे। नीलोत्पलद्वन्द्वात् शिताः तीक्ष्णाः शराः निस्सरन्ति निर्गच्छन्तीत्युदाहरणम्। अत्र विषयभूतकान्तालोचनद्वन्द्वकटाक्षाणां तद्वाचिपदैः उपादानं विना विषयिवाचिनीलोत्पलशब्दाभ्यामेव उपादानं कृत्वा नीलोत्पलद्वन्द्वबाणाभेदाध्यवसानात् रूपकातिशयोक्तिः।

[रूपके विषयविषयिणोः स्वपदोपात्तयोरभेदप्रतिपत्तिः आरोपः। रूपकातिशयोक्तौ तु विषयस्य स्वपदोपादानं विना विषयिवाचिपदेनैव उपादानपूर्वकं विषयविषयिणोराहार्याभेदनिश्चयः अध्यवसायः, इत्यनयोर्भेदः। उत्प्रेक्षायामभेदसंभावनैव, नतु निश्चयः। भ्रान्तौ अभेदप्रतिपत्तिः न आहार्या, किन्त्वन्यथाग्रहणजन्या इत्येवं भेदः अवगन्तव्यः]

When the Upameya totally merges in the Upamāna which is super-imposed on it, the figure of speech is रूपकातिशयोक्तिः। This arises from निगीर्याध्यवसान - the suppression of the उपमेय by not mentioning it and attributing to it the character of the उपमान, which alone is mentioned.

'Look! sharp arrows issue forth from a pair of blue lotuses' is the example of रूपकातिशयोक्ति. Here the pair of eyes and side-glances (कटाक्ष) are the Upameyas which are

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

१३. अतिशयोक्त्यलङ्कारः

अतिशयस्य लोकमर्यादातिवर्तिनः (कविसम्मतस्य) विशेषस्य उक्तिः अतिशयोक्तिः इति नाम्नैव अस्यालङ्कारस्य सामान्यलक्षणमुक्तं भवति। तथा च दण्डी—

"विवक्षा या विशेषस्य लोकसीमातिवर्तिनी।
असावतिशयोक्तिः स्यात्" इति।

अतिशयोक्तिरष्टविधा (१) रूपकातिशयोक्तिः, (२) सापह्नव-रूपकातिशयोक्तिः, (३) भेदकातिशयोक्तिः, (४) संबन्धातिशयोक्तिः, (५) असंबन्धातिशयोक्तिः, (६) अक्रमातिशयोक्तिः, (७) चपलातिशयोक्तिः, (८) अत्यन्तातिशयोक्तिः, इति। एतेषां क्रमेण लक्षणोदाहरणानि दीयन्ते।

When a speciality far exceeding the usual limits of propriety is expressed, it is अतिशयोक्तिः (अतिशयस्य लोकसीमातिवर्तिनो विशेषस्य उक्तिः). The fundamental principle of अतिशयोक्ति (Hyperbole) is exaggeration. Eight kinds of अतिशयोक्ति are defined and illustrated here. They are (1) रूपकातिशयोक्तिः, (2) सापह्नवरूपकातिशयोक्तिः, (3) भेदकातिशयोक्तिः, (4) संबन्धातिशयोक्तिः, (5) असंबन्धातिशयोक्तिः, (6) अक्रमातिशयोक्तिः, (7) चपलातिशयोक्तिः and (8) अत्यन्तातिशयोक्तिः।

(१) रूपकातिशयोक्तिः

रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः।
पश्य नीलोत्पलद्वन्द्वान्निस्सरन्ति शिताः शराः॥ ३४॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

निगीर्य, विषयस्य स्वशब्देनोपादानं विना विषयिवाचकपदेनैव ग्रहणं कृत्वा, अध्यवसानतः विषयस्य विषयिरूपेण आहार्यनिश्चयात् अतिशयोक्तिः स्यात्। आहार्यत्वं नाम बाधकालीनेच्छाजन्यत्वम्। यत्रोपमेयं मुखादिकं तद्वाचिमुखादिपदेन अनुपादाय उपमानवाचिचन्द्रादिपदैरेवोपादाय चन्द्रादिरूपेण (चन्द्राद्यभेदतादृप्यान्यतररूपेण) अवधार्यते तत्र रूपकातिशयोक्तिरिति निष्कर्षः। हे सखे। नीलोत्पलद्वन्द्वात् शिताः तीक्ष्णाः शराः निस्सरन्ति निर्गच्छन्तीत्युदाहरणम्। अत्र विषयभूतकान्तालोचनद्वन्द्वकटाक्षाणां तद्वाचिपदैः उपादानं विना विषयिवाचिनीलोत्पलशब्दाभ्यामेव उपादानं कृत्वा नीलोत्पलद्वन्द्वबाणाभेदाध्यवसानात् रूपकातिशयोक्तिः।

[रूपके विषयविषयिणोः स्वपदोपात्तयोरभेदप्रतिपत्तिः आरोपः। रूपकातिशयोक्तौ तु विषयस्य स्वपदोपादानं विना विषयिवाचिपदेनैव उपादानपूर्वकं विषयविषयिणोराहार्याभेदनिश्चयः अध्यवसायः इत्यनयोर्भेदः। उत्प्रेक्षायामभेदसंभावनैव, नतु निश्चयः। भ्रान्तौ अभेदप्रतिपत्तिः न आहार्या, किन्त्वन्यथाग्रहणजन्या इत्येवं भेदः अवगन्तव्यः]

When the Upameya totally merges in the Upamāna which is super-imposed on it, the figure of speech is रूपकातिशयोक्तिः। This arises from निगीर्याध्यवसान - the suppression of the उपमेय by not mentioning it and attributing to it the character of the उपमान, which alone is mentioned.

'Look! sharp arrows issue forth from a pair of blue lotuses' is the example of रूपकातिशयोक्ति. Here the pair of eyes and side-glances (कटाक्ष) are the Upameyas which are

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

not mentioned and they merge in the Upamānas—the pair of blue lotuses and arrows. The eyes and side-glances are definitely identified as blue lotuses and arrows. 34

In रूपक there is identification of the उपमेय with the उपमान but there is no suppression (निगरण) of the उपमेय। Both उपमान and उपमेय are mentioned and identified as one and that is called आरोप। In अतिशयोक्ति, the उपमेय is suppressed by not mentioning it and it is identified with the उपमान which is mentioned. This is called अध्यवसान। In उत्प्रेक्षा the उपमेय is fancied as the उपमान but it is not definitely determined to be the उपमान। In अतिशयोक्ति the identification is definitely determined. In उत्प्रेक्षा there is संभावना only while in अतिशयोक्ति there is अध्यवसान. In भ्रान्ति the identity is the result of a clear misunderstanding of उपमेय while the identification of the उपमेय with उपमान in अतिशयोक्ति is deliberate (आहार्य). These subtle differences must be clearly understood.

रूपकातिशयोक्तेः अपरमुदाहरणम्

वापीपी काचित्स्फुरति गगने तत्परं सूक्ष्मपद्मा
सोपानालीमधिगतवती काञ्चनीमैन्द्रनीली।
अग्रे शैलौ सुकृतिसुगमौ चन्दनच्छन्नदेशौ
तत्रत्यानां सुलभममृतं संविधानात्सुधांशोः॥

अत्र वापीगगनसूक्ष्मपद्मादिभिः उपमानवाचकशब्दैः नाभि, मध्य, रोमावलिप्रभृतीनि उपमेयानि निगीर्णानि, वाप्यादिरूपेण अध्यवसितानि चेति रूपकातिशयोक्तिः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(२) सापह्नवा रूपकातिशयोक्तिः

यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता ।
त्वत्सूक्तिषु सुधा राजन् भ्रान्ताः पश्यन्ति तां विधौ ॥

सैव रूपकातिशयेक्तिरेव यदि अपह्नवगर्भा निषेधघटिता तर्हि सापह्नवा रूपकातिशयोक्तिरिति मता उच्यते । हे राजन् तव सूक्तिषु मधुरवचनेषु सुधा अमृतं, वर्तत इति शेषः । भ्रान्ताः अज्ञानिनः उन्मत्ता वा तां सुधां विधौ चन्द्रे पश्यन्ति जानन्ति । परमार्थतः चन्द्रे सुधा नास्तीति भावः । अत्र सूक्तिमाधुर्ये सुधात्वाध्यवसानस्य चन्द्रे सुधा नास्तीति निषेधगर्भत्वात् सापह्नवा रूपकातिशयोक्तिः ।

When the super-imposition of the उपमान on the suppressed उपमेय (रूपकातिशयोक्ति) is accompanied by a denial also, it is सापह्नवा रूपकातिशयोक्तिः । 'O ! king, there is nectar in your speech, insane people see it (nectar) in the moon' is the example of सापह्नवा रूपकातिशयोक्तिः । The nectar is super-imposed in the sweetness of the king's speech which has been suppressed and that super-imposition is accompanied by a denial of the nectar in the moon. The statement that mad or ignorant people see nectar in the moon amounts to the denial of the same in the moon. 35

अस्या एवापरमुदाहरणम्

मुक्ताविद्रुममन्तरा मधुरसः पुष्पं परं धूर्वह
प्रालेयद्युतिमण्डले खलु तयोरेकासिका नार्णवे ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तच्चोदञ्चति शङ्खमूर्ध्नि न पुनः पूर्वाचलाभ्यन्तरे
तानीमानि विकस्वरयन्ति तत इमे येषां न सा दृक्पथे ॥

अत्र मुक्ताविद्रुमयोर्मध्ये मधुरशब्दः, पुष्परसस्तु न मधुरसः मुक्ताविद्रुमौ चन्द्रमण्डले वर्तेते, न त्वर्णवे; चन्द्रश्च शङ्खशिरसि उदेति, न पूर्वाद्रिपरिसरे इत्यादौ मुक्ता, विद्रुम, मधुरस, चन्द्रमण्डल, शङ्खशब्दैः दन्त, अधर, अधरमाधुर्य, मुख, कण्ठाः निगीर्णाः मुक्तादि-रूपेणाध्यवसिताश्च। पुष्पं परं धूर्वहमित्यादौ पुष्परसो न मधुरस इत्येव-मादिनिषेधस्य गम्यमानत्वात् सापह्नवा रूपकातिशयोक्तिः।

(३) भेदकातिशयोक्तिः

भेदकातिशयोक्तिः स्यात्तस्यैवान्यत्ववर्णनम्।
अन्यदेवास्य गाम्भीर्यमन्यद्धैर्यं महीपतेः ॥ ३६ ॥

तस्यैव लोकप्रसिद्धस्यैव विषयस्य गाम्भीर्यादेः अन्यत्ववर्णनं अभेदेऽपि भेदवर्णनं भेदकातिशयोक्तिः। अस्य महीपतेः गाम्भीर्य अन्यदेव, धैर्यमप्यन्यदेव लोकविलक्षणमेव इत्यत्र गाम्भीर्यधैर्ययोः लोकसा-धारणत्वेऽपि (अभेदेऽपि) विलक्षणत्वं (भेदः) वर्णितमिति भेदकाति-शयोक्तिः।

When a thing is described as different from itself, the figure is भेदकातिशयोक्तिः। 'The profoundity and courage of this king are different' is the example. The profundity and courage of this particular king are not really different

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

•Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

from those of others. They are the same everywhere. Yet they are spoken as different and hence this is भेदकातिशयोक्तिः। 36

अस्या एवापरमुदाहरणम्

अन्येयं रूपसम्पत्तिरन्या वैदग्ध्यधोरणी।
नैषा नलिनपत्राक्षी सृष्टिः साधारणी विधेः॥

अत्र लोकसिद्धरूपसम्पत्त्याद्यभेदेऽपि भेदो वर्णित इति भेदकातिशयोक्तिः।

(४) संबन्धातिशयोक्तिः

संबन्धातिशयोक्तिः स्यादयोगे योगकल्पनम्।
सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम् ॥ ३७॥

अयोगे असंबन्धे सति योगकल्पनं संबन्धवर्णनं यत् सा सम्बन्धातिशयोक्तिः। अस्य पुरस्य सौधाग्राणि प्रासादशिखराणि विधुमण्डलं चन्द्रमण्डलं स्पृशन्ति इत्यत्र समुन्नतानां सौधशिखराणां वस्तुतः विधुमण्डलस्पर्शासम्बन्धेऽपि तत्सम्बन्धवर्णनात् संबन्धातिशयोक्तिः।

The description of some connection where it does not really exist is called सम्बन्धातिशयोक्तिः। 'The tops of the towers in this city touch the moon' is the example. The towers, though tall, do not really touch the moon; yet they are described as touching it. Hence (असंबन्धे संबन्धकल्पनात्) this is an example of Sambandhatisayokti. 37

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अस्या एवापरमुदाहरणम्

कतिपयदिवसैः क्षयं प्रयायात् कनकगिरिः कृतवासरावसानः ।
इति मुदमुपयाति चक्रवाकी वितरणशालिनि वीररुद्रदेवे ॥

अत्र सूर्यास्तसमकारकस्य कनकगिरेः महामेरोः क्षयसंभावना-प्रयुक्तेन सन्तोषेण चक्रवाक्याः संबन्धाभावेऽपि तत्सम्बन्धवर्णनात् सम्बन्धातिशयोक्तिः ।

(५) असंबन्धातिशयोक्तिः

गोगेऽप्ययोगोऽसंबन्धातिशयोक्तिरितीर्यते ।
त्वयि दातरि राजेन्द्र स्वर्द्रुमान्नाद्रियामहे ॥ ३८ ॥

योगे सम्बन्धे सत्यपि अयोगः असंबन्धवर्णनं असंबन्धातिशयोक्तिः इति ईर्यते उच्यते । हे राजेन्द्र ! त्वयि दातरि वितरणशालिनि सति स्वर्द्रुमान् कल्पवृक्षान् न आद्रियामहे न याचामहे इत्युदाहरणम् । राज्ञि दानशीले सत्यपि स्वर्द्रुमेषु सर्वेषामादरो भवत्येव । तथा च आदरयोगेऽपि 'नाद्रियामहे' इत्ययोगकल्पनात् असंबन्धातिशयोक्तिः ।

Where the absence of connection is described while the connection really exists, it is असम्बन्धातिशयोक्तिः. 'O King! when you are a giver (of gifts), we do not beg (show regard to) the heavenly trees (कल्पवृक्ष)', is the example. In spite of all that is given by the king, people do really have regard for कल्पवृक्ष which would give what-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ever is required. Since the connection with that regard which really exists is described as absent, this is असंबन्ध अतिशयोक्तिः। 38

अस्या अपरमुदाहरणम्

अनयोरनवद्याङ्गि स्तनयोः जृम्भमाणयोः।
अवकाशो न पर्याप्तस्तव बाहुलतान्तरे॥

अत्र वर्धमानयोः स्तनयोः पर्याप्तस्य अवकाशस्य बाहुमध्ये सत्वात् तत्संबन्धे सत्यपि 'न पर्याप्त' इति असंबन्धवर्णनात् असंबन्धातिशयोक्तिः।

(६) अक्रमातिशयोक्तिः

अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकाययोः।
आलिङ्गन्ति समं देव ज्यां पराश्च शराश्च ते॥ ३९॥

हेतुकार्ययोः कार्यकारणयोः सहत्वे यौगपद्ये (वर्ण्यमाने सति) अक्रमातिशयोक्तिरिती लक्षणम्। कारणं पूर्वं, कार्यं तदनन्तरमिति नियममुल्लङ्घ्य हेतुकार्ययोः एककालत्ववर्णनं अक्रमातिशयोक्तिरित्यथः। हे राजन्! तव शराः बाणाः, पराः शत्रवश्च, ज्यां मौर्वीं भूमिं च समं युगपद् आलिङ्गन्ति इत्युदाहरणम्। अत्र मौर्व्या शरसन्धानरूपकारणस्य शत्रूणां भूपतनरूपकार्यस्य च पौर्वापर्ये विद्यमानेऽपि यौगपद्यवर्णनाद-क्रमातिशयोक्तिः।

When the cause and the effect are described to occur simultaneously, the figure of speech is अक्रमाति-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शयोक्तिः। क्रम means order. The usual order of the cause and effect is—the cause occurs first and then the effect. When that order is ignored and the cause and effect are said to happen at one and the same time, it is Akramatisayokti. Oh Lord! Your arrows and enemies embrace the bowstring and ground simultaneously' is the example. Really the arrows are first fixed in the bow-string and discharged and then only the enemies fall on the ground. Here both, the cause and effect, are said to occur at the same moment. This suggests the quickness and ease with which the arrows are shot. 39

अस्या अपरमुदाहरणम्

मुञ्चति मुञ्चति कोशं भजति च भजति प्रकम्पमरिवर्गः।
हम्मीरवीरखड्गे त्यजति त्यजति क्षमामाशु॥

अत्र हम्मीरवीरस्य खड्गः यदा कोशं मुञ्चति, तदैव अरिवर्ग कोशं भाण्डागारं मुञ्चति, यदा खड्गः कम्पते तदैव शत्रवोऽपि कम्पन्ते इत्यादौ कार्यकारणयोर्यौगपद्यवर्णनाद् अक्रमातिशयोक्तिः।

(७) चपलातिशयोक्तिः

चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे।
यास्यामीत्युदिते तन्व्याः वलयोऽभवदूर्मिका॥ ४०॥

कार्ये हेतुप्रसक्तिजे, हेतोः कारणस्य प्रसक्तया ज्ञानमात्रेण कार्यस्य जननवर्णने चपलातिशयोक्तिरलङ्कारः। यास्यामि दूरदेशं गमिष्यामि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इति (नायकेन) उक्ते सति, विरहकारणज्ञानमात्रेण तन्व्याः नायिकाया ऊर्मिका अङ्गुलीयकं वलयः हस्ताभरणं अभूत् इत्युदाहरणम्। अत्र भविष्यद्विरहरूपकारणस्य ज्ञानमात्रेण तन्व्याः कृशता सञ्जाता यस्मादङ्गुलीयकं हस्ताभरणमभूदिति कार्योत्पत्तिवर्णनात् चपलातिशयोक्तिः।

Where the effect is said to have been produced by the mere mention of the cause. the figure is चपलातिशयोक्तिः। When the lover said 'I will go', the ring of the lady became her bracelet' is the example. Here the mere mention of the cause-lover's departure-is said to have produced the effect—the slimness of the lady as a result of which her ring could be used as a bracelet. 40

अस्या अपरमुदाहरणम्

आदातुं सकृदीक्षितेऽपि कुसुमे हस्ताग्रमालोहितं
लाक्षारञ्जनवार्तयापि सहसा रक्तं तलं पादयोः।
अङ्गानामनुलेपनस्मरणमप्यत्यन्तखेदावहं
हन्ताऽधीरदृशः किमन्यदलकामोदोऽपि भारायते॥

अत्र सहजसौकुमार्यायाः नायिकायाः विरहावस्थायां आदानेच्छया कुसुमेक्षणमात्रेण हस्ताग्रं लोहितमभूत्, लाक्षारसवार्तयापि पादतलं रक्तमभूदित्यादौ कारणप्रसक्तिमात्रेण कार्योत्पत्तिवर्णनात् चपलातिशयोक्तिः।

अस्या एवोदाहरणान्तरम—

यामि न यामीति धवे वदति पुरस्तात्क्षणेन तन्वङ्ग्याः।
गलितानि पुरो वलयानि अपराणि तथैव दलितानि॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र यामि न यामीति विरहतदभावयोः प्रसक्तिमात्रेण युगपत्संजात-कृशत्वपीनत्वरूपकार्यद्वारा पुरोवलयगलनं अपरेषां दलनं च युगपत्सञ्जातमिति हेतुप्रसक्तिजन्यकार्ययोरपि समकालत्वं वर्णितमिति विशेषः ।

(८) अत्यन्तातिशयोक्तिः

अत्यन्तातिशयोक्तिः स्यात्पौर्वापर्यव्यतिक्रमे ।
अग्रे मानो गतः पश्चादनुनीता प्रियेण सा ॥ ४१ ॥

कार्यकारणयोः पौर्वापर्यस्य पूर्वोत्तरक्रमस्य व्यतिक्रमे उल्लङ्घने सति अत्यन्तातिशयोक्तिः । पूर्वं कारणं पश्चात् कार्यं इति सिद्धं क्रममुल्लङ्घ्य कार्योत्पत्तेरनन्तरं कारणसंभववर्णनं अत्यन्तातिशयोक्तिरित्यर्थः । मानः प्रणयकोपः अग्रे प्रथमं गतः, पश्चात् सा नायिका प्रियेण अनुनीता इत्यत्र प्रसिद्धकारणात् अनुनयात् पूर्वमेव कार्यस्य मानत्यागस्योत्पत्तिवर्णनात् (कार्यकारणयोः पौर्वापर्यविपर्ययरूपायाः) अत्यन्तातिशयोक्तेः उदाहरणमिदम् ।

When the order of cause and effect is reversed, it is अत्यन्तातिशयोक्तिः । It is the rule that cause should precede the effect. Violating this rule, if the effect is described as preceding the cause, it is अत्यन्तातिशयोक्तिः । 'Her anger subsided first and then she was appeased by her lover' is the example. The disappearance of anger (प्रणयकोप) is the result of the lover's appeasement and hence it should occur only later. But here it is described to have occured

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

first, and thus the accepted order is reversed and hence अत्यन्तातिशयोक्तिः ।

अस्या एवापरमुदाहरणम्

कवीन्द्राणामासन् प्रथमतरमेवाङ्कणभुवः
चलद्भृङ्गासङ्गाकुलकरिमदामोदमधुराः।
अमी पश्चात्तेषामुपरि पतिता रुद्रनृपतेः
कटाक्षाः क्षीरोदप्रसरदुरुवीचीसहचराः॥

अत्र प्रथमं कवीनामङ्कणभुवः रुद्रनृपतिदत्तकरिभिः पूर्णाः, तदनन्तरं च नृपतेः कटाक्षाः कवीनामुपरि पतिताः इति कार्यभूत-करिदानानन्तरं कारणभूतकटाक्षपातवर्णनात् अत्यन्तातिशयोक्तिः ।

[अत्रेदमवधेयम्—अन्त्यास्तिस्रः अक्रमचपलात्यन्तातिशयोक्त्यः कार्यकारणक्रमनिबन्धनाः कार्यशैघ्र्यं द्योतयन्ति ।]

१४. तुल्ययोगितालङ्कारः

तुल्यानां सादृश्यवतां योगिता एकधर्मान्वयित्वं तुल्ययोगिता । सा चतुर्विधा—(१) प्रस्तुतैकधर्मान्वयरूपा (२) अप्रस्तुतैकधर्मान्वयरूपा (३) हिताहितवृत्तितौल्यरूपा (४) उत्कृष्टसमीकरणोक्तिरूपा चेति । आसां क्रमेण लक्षणोदाहरणानि दीयन्ते ।

तुल्यानां योगिता—The connection of similar objects with a common action or attribute (धर्म) is तुल्ययोगिता । It is of four kinds,—(1) प्रस्तुतैकधर्मान्वयरूपा—Where all the similar objects are relevant (वर्ण्य), (2) अप्रस्तुतैकधर्मान्वयरूपा—

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Where the similar objects are all non-relevant (अवर्ण्य), (3) हिताहितवृत्तितौल्यरूपा—Where equal treatment of a friend and foe is described and (4) उत्कृष्टसमीकरणोक्तिरूपा—Where equality with superiors is described. These four kinds of Tulyayogitā are defined and illustrated in the same order.

प्रथमद्वितीये तुल्ययोगिते

वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता ।
संकुचन्ति सरोजानि स्वैरिणीवदनानि च ॥ ४२ ॥

वर्ण्यानां प्रस्तुतानामेव, अथवा इतरेषां अप्रस्तुतानामेव धर्मैक्यं गुणक्रियारूपैकधर्मान्वयः तुल्ययोगितालङ्कारः । यत्र द्वयोः प्रस्तुतयोरेव, बहूनां प्रस्तुतानामेव वा एकधर्मान्वयः वर्ण्यते तत्र प्रथमा तुल्ययोगिता । यत्र द्वयोः बहूनां वा अप्रस्तुतानामेव एकधर्मान्वयः तत्र द्वितीया तुल्ययोगिता इति निष्कर्षः । मूले 'वर्ण्यानां इतरेषां' इत्युभयत्र बहुवचनमनेकत्वाभिप्रायेण प्रयुक्तम् । तथा च अनेकप्रस्तुतमात्रसंबद्धैकधर्मत्वं प्रथमायाः, अनेकाप्रस्तुतमात्रसंबद्धैकधर्मत्वं द्वितीयायाश्च तुल्ययोगितायाः लक्षणम् ।

सरोजानि पद्मानि स्वैरिणीनां अभिसारिकाणां वदनानि मुखानि च सङ्कुचन्ति सङ्कोचं प्राप्नुवन्ति इति (प्रथमायाः) प्रस्तुततुल्ययोगितायाः उदाहरणम् । चन्द्रोदये सरोजानि संकुचन्ति निमीलन्ति, स्वैरिणीवदनानि च प्रकाशभयात् संकुचन्ति । तथा च वर्ण्यानामेव सरोजानां स्वैरिणीवदनानां च सङ्कोचरूपैकक्रियान्वयवर्णनात् प्रस्तुततुल्ययोगिता ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्वदङ्गमार्दवे दृष्टे कस्य चित्ते न भासते ।
मालतीशशभृल्लेखाकदलीनां कठोरता ॥ ४२ ॥

हे प्रिये !, तव अङ्गमार्दवे दृष्टे सति कस्य सचेतसः चित्ते मालतीकुसुमचन्द्रलेखाकदलीनां कठोरता न भासते? इति (द्वितीयायाः) अप्रस्तुततुल्ययोगितायाः उदाहरणम् । अत्र नायिकासौकुमार्यवर्णने प्रस्तुते, अप्रस्तुतानां मालतीशशभृल्लेखाकदलीनां कठोरतारूपैकगुणान्वय-वर्णनात् अप्रस्तुततुल्ययोगिता ।

When a common action or attribute is described with reference to a number of relevant objects only (वर्ण्य) or non-relevant objects only, the figure is तुल्ययोगिता. Where the relevant objects are connected with a common धर्म, it is the first variety called प्रस्तुततुल्ययोगिता. Where non-relevant objects are connected with a common धर्म, it is the second variety called अप्रस्तुततुल्ययोगिता. 'The lotuses and the faces of prostitutes shrink (at the rise of the moon)' is the example of the first variety, प्रस्तुततुल्ययोगिता । Here, in the context of describing the moon-rise, both the lotuses and the faces of prostitutes are relevant and the common action of सङ्कोच is described with reference to both of them. 42.

'When the tenderness of your body is seen, who would not feel the roughness of the jasmine, moon's

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

digit and the plantain?' Here, in the context of describing the tenderness of the lady, the jasmine flower, the moon's digit and the plantain are all non-relevant (अस्तुत) and the common attribute of roughness is mentioned with reference to all of them. Hence this is an example of the second variety, अप्रस्तुततुल्ययोगिता। 43

प्रथमद्वितीययोः तुल्ययोगितयोः अपरे उदाहरणे

संजातपत्रप्रकरान्वितानि समुद्वहन्ति स्फुटपाटलत्वम्।
विकस्वराण्यर्ककराभिमर्शाद् दिनानि पद्मानि च वृद्धिमीयुः॥

अत्र ग्रीष्मवर्णने दिनानि पद्मानि च प्रस्तुतानि सूर्यकिरणसंस्पर्शाद् वृद्धिं आपुः इति प्रस्तुतानामेव वृद्धिप्राप्तिरूपैककक्रियान्वयवर्णनात् प्रस्तुततुल्ययोगिता।

नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात्कदलीविशेषाः।
लब्ध्वापि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः॥

अत्र ऊरुवर्णने अप्रस्तुतानि नागेन्द्रहस्ताः कदलीविशेषाश्च। ते च ऊर्वोरुपमानबाह्याः जाताः इति अप्रस्तुतानां नागेन्द्रहस्तकदलीविशेषाणां उपमानबाह्यत्वरूपैकधर्मान्वयवर्णनाद् अप्रस्तुततुल्ययोगिता।

तृतीया तुल्ययोगिता

हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता।
प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया॥ ४४॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

हिताहिते मित्रामित्रविषये वृत्तेः व्यापारस्य तौल्यं साम्यं एकविधव्यवहरणं अपरा अन्या तृतीया तुल्ययोगिता। हे राजन्! त्वया मित्रशात्रवयोः विषये (मित्रेभ्यः शत्रुभ्यश्च) परभूतिः परा उत्कृष्टा भूतिरैश्वर्यं, पराभवश्च प्रदीयते इत्युदाहरणम्। अत्र हिते मित्रे अहिते शत्रौ च पराभूतिदानरूपसमानव्यापारवर्णनात् तुल्ययोगिता। उत्कृष्टभूतिदानस्य पराभवदानस्य च श्लेषेणाभेदाध्यवसानात् तुल्यत्वम्।

Equal treatment of friends and foes is another (third) variety of तुल्ययोगिता. 'O King! You give पराभूति- enormous wealth and defeat to the friends and foes' is the example. पराभूति means riches in the case of friends and defeat in the case of foes. These two meanings are identified as one by श्लेष in the word पराभूति and the king is said to give the same treatment - पराभूतिदान-to friends and foes. Hence this is the third variety of तुल्ययोगिता 44

अस्या एवापरमुदाहरणम्

यश्च निम्बं परशुना, यश्चैनं मधुसर्पिषा।
यश्चैनं गन्धमाल्याद्यैः, सर्वस्य कटुरेव सः॥

अत्र वृश्चति, सिञ्चति, अर्चति इति क्रियापदान्यध्याहार्याणि। परशुना छेदादहिते मधुसर्पिषा गन्धमाल्यादिभिश्च पूजनात् हिते च उभयत्र निम्बः कटुरेवेति समानव्यापारवर्णनात् तुल्ययोगितालक्षणसङ्गतिः। पूर्वोदाहरणं राज्ञः स्तुतिपर्यवसायि, इदं तु निम्बस्य निन्दापर्यवसायीति भेदः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

चतुर्थी तुल्ययोगिता

गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता।
लोकपालो यमः पाशी श्रीदः शक्रो भवानपि ॥ ४५ ॥

गुणोत्कृष्टैः शौर्यादिगुणैः श्रेष्ठैः समीकृत्य समानं कृत्वा (साम्यं विवक्षित्वा) वचः वचनं वर्णनं अन्या चतुर्थी तुल्ययोगिता। उत्कृष्टगुणैः धर्मतः समानीकृत्य वर्णनं अन्या तुल्ययोगितेत्यर्थः। यमः, पाशी-वरुणः, श्रीदः-कुबेरः, शक्रः-इन्द्रः, भवानपि लोकपालः इत्यत्र वर्णनीयो राजा उत्कृष्टगुणैर्यमादिभिः लोकपालत्वरूपधर्मतः समानीकृत्य वर्णित इति लक्षणसमन्वयः।

Describing a thing (वर्ण्य) on an equal footing with others of superior merits on the basis of a common quality is another (fourth) variety of तुल्ययोगिता। 'Yāma, varuna, Kubera, Indra and Yourself are the protectors of the world,' is the example. Here the king is put on an equal footing with Yama and others of superior merits on the basis of the common function of protecting the world, and hence this is an example of the fourth variety of तुल्ययोगिता। 45

अस्याः अन्यदुदाहरणम्

सङ्गतानि मृगाक्षीणां तडिद्विलसितानि च।
क्षणद्वयं न तिष्ठन्ति घनारब्धान्यपि स्वयम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र स्त्रीणां समागमाः विद्युतां विलसितानि च क्षणद्वयं न तिष्ठन्तीति क्षणद्वयानवस्थानरूपधर्मतः मृगाक्षीसङ्गतानां तडिद्विलसितैः समीकृत्य प्रतिपादनात् तुल्ययोगितालक्षणसङ्गतिः। पूर्वोदाहरणं स्तुतिपर्यवसायि, इदं तु निन्दापर्यवसायीति भेदः।

१५. दीपकालङ्कारः

वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः।
मदेन भाति कलभः प्रतापेन महीपतिः॥ ४६॥

वर्ण्यावर्ण्यानां प्रस्तुताप्रस्तुतानां धर्मैक्यं एकधर्मान्वयः दीपकं इति बुधाः वदन्ति। अत्रापि वर्ण्यावर्ण्यानामिति बहुवचनं अनेकत्वाभिप्रायेणेति बोध्यम्। वर्ण्यावर्ण्यान्वितैकधर्मो दीपकम् इति लक्षणम्। तुल्ययोगितायां वर्ण्यानामेव, अथवा अवर्ण्यानामेव एकधर्मान्वयः, दीपके तु वर्ण्यावर्ण्यानामिति भेदः। कलभः करिकलभः मदेन भाति शोभते, महीपतिः प्रतापेन शौर्येण (भाति शोभते) इत्युदाहरणम्। अत्र वर्ण्यस्य राज्ञः अवर्ण्यस्य कलभस्य च भानरूपैकक्रियान्वयो वर्णित इति लक्षणसमन्वयः। सादृश्यमत्र गम्यम्। प्रस्तुतोपयोगितया प्रयुक्तो धर्मः (अत्र भानरूपः) अप्रस्तुतोपयोग्यपि भवति, यथा गृहप्रकाशनार्थं प्रदीपितो दीपः रथ्यामपि प्रकाशयति इति दीपसादृश्याद्दीपकं इत्यन्वर्थसंज्ञा। दीप इव दीपकं इति इवार्थे कन् प्रत्ययः।

Where a common attribute is predicated with the relevant and non-relevant objects (प्रस्तुताप्रस्तुत), the figure is दीपकम्। Dipaka is so called because the lamp lit for the

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

house lights the street as well. In the same way, the common attribute predicated with reference to the relevant object applies to the non-relevant also—दीपसादृश्यात् दीपकम्। 'The young elephant shines with rut, the king (shines) with valour' is the example. Here भाति-shining is the common attribute predicated with reference to the वर्ण्य—the king but it also applies to the अवर्ण्य-the young elephant. Similarity is suggested here.

The difference between दीपक and तुल्ययोगिता should be noted. In Dipaka, the relevant and non-relevant objects are connected with a common attribute while in तुल्ययोगिता, either the relevant objects alone, or the non-relevant objects alone are connected with the common attribute. 46

दीपकस्यापरमुदाहरणम्

मणिः शाणोल्लीढः समरविजयी हेतिदलितः
मदक्षीणो नागः शरदि सरिदाध्यानपुलिना।
कलाशेषश्चन्द्रः सुरतमृदिता वलवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः॥

अत्र अर्थिषु गलितविभवाः नृपाः, शाणोल्लीढमण्यादयश्च तनिम्ना कार्श्येन शोभन्ते इति प्रकृतानां नृपाणां अप्रकृतानां मण्यादीनां च शोभारूपैकधर्मान्वयवर्णनात् दीपकलक्षणसङ्गतिः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

१६. आवृत्तिदीपकालङ्कारः

त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम् ।

दीपकस्य अनेकोपकारार्थतया दीपस्थानीयस्य पदस्य, अर्थस्य, उभयोर्वा आवृत्तौ सत्यां आवृत्तिदीपकं त्रिविधं भवति (१) पदावृत्तिदीपकम्, (२) अर्थावृत्तिदीपकम्, (३) पदार्थोभयावृत्तिदीपकम् इति । एतेषां क्रमेणोदाहरणानि दीयन्ते ।

When the word, meaning or both that connects the relevant and the non-relevant (through a common attribute) is repeated, we get three kinds of आवृत्तिदीपकम् । (1) पदावृत्तिदीपकम्—Where the word is repeated, (2) अर्थावृत्तिदीपकम्—Where the meaning is repeated and (3) पदार्थोभयावृत्तिदीपकम्—Where both the word and the meaning are repeated. They are illustrated in the same order.

(१) पदावृत्तिदीपकस्य उदाहरणम्

वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी ॥ ४७ ॥

इयं अम्बुदमाला मेघपङ्क्तिः वर्षति जलं मुञ्चति; एषा शर्वरी च रात्रिश्च वर्षति वर्षः संवत्सर इवाचरति इत्यत्र श्लेषवशात् प्रकृताप्रकृतोपकारयोग्यस्य 'वर्षति' इति पदस्य वाक्यद्वये आवृत्तेः सत्वात्, अर्थस्य च भिन्नत्वात् पदावृत्तिदीपकम् । विरहिणीवचनत्वात् रात्रेः संवत्सरायमाणत्वं युक्तम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वस्तुतस्त्वत्र दीपकलक्षणं नास्ति, विरहोद्दीपकतया मेघमालायाः रात्रेश्च प्रकृतत्वात्। तस्मादावृत्तिरेवालङ्कारः,दीपकच्छायायाः सत्वात् आवृत्तिदीपकमिति व्यपदेशः।

This line of clouds rains (वर्षति) and this night is long (acts) like a year (वर्षति)' is the example of पदावृत्ति-दीपकम्। Here the word वर्षति which is the connecting link between the line of clouds and the night through श्लेष is repeated but the meaning is different. So this is पदावृत्ति-दीपकम्। Since a lover in separation is the speaker, the night appears long as a year.

Strictly speaking, there is no Dipaka here because both the clouds and the night are relevant in the case of a separated lover. So आवृति is the Alankāra. It is called आवृत्तिदीपकम् only because it has some resemblance of दीपक। 47

अस्यैवापरमुदाहरणम्

उत्कण्ठयति मेघानां माला वर्गं कलापिनाम्।
यूनां चोत्कण्ठयत्यद्य मानसं मकरध्वजः॥

अत्र मेघमाला मयूरसमूहं उत्कण्ठयति ऊर्ध्वकण्ठं करोति, मकरध्वजः यूनां मनः उत्कण्ठयति उत्सुकं करोति इत्ति अर्थभेदे सति पदस्यावृत्तेः पदावृत्तिदीपकम्।

(२) अर्थावृत्तिदीपकस्य उदाहरणम्

उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजद्रुमाः।

CC-0. Bhagavad Ramanuja National Research Institute. Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कदम्बानि कदम्बकुसुमानि उन्मीलन्ति, कुटजद्रुमाः गिरिमल्लिकाः स्फुटन्ति विकसन्ति इत्यत्र शब्दयोः भेदेऽपि विकासरूपार्थस्य आवृत्तेः अर्थावृत्तिदीपकम्।

'The Kadamba flowers blossm, Kuṭaja trees blossm' is the example of अर्थावृत्तिदीपकम्। Here the meaning 'blossom' is repeated though it is expressed by different words—उन्मीलन्ति and स्फुटन्ति।

अस्यैवापरमुदाहरणम्

शमयति जलधरधारा चातकयूनां तृषं चिरोपनताम्।
क्षपयति च बधूलोचनजलधारा कामिनां प्रवासरुचिम्॥

अत्र शमयति, क्षपयति इति शब्दयोर्भेदेऽपि एकस्यैवार्थस्य आवृत्तिरिति अर्थावृत्तिदीपकम्।

(३) शब्दार्थोभयावृत्तिदीपकस्य उदाहरणम्

माद्यन्ति चातकास्तृप्ताः माद्यन्ति च शिखावलाः॥ ४८॥

चातकाः (मेघोदकपानेन) तृप्ताः सन्तुष्टाः माद्यन्ति मत्ता भवन्ति, शिखावलाः मयूराश्च (मेघदर्शनेन तद्गर्जनश्रवणेन च) माद्यन्ति मत्ता भवन्ति इत्यत्र माद्यन्ति इति पदस्य मदप्राप्तिरूपार्थस्य च आवृत्तत्वात् शब्दार्थोभयावृत्तिदीपकम्।

'The चातक birds which are happy (by drinking water direct from the clouds) get intoxicated, the peacocks too get intoxicated (by seeing the clouds and hearing the

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

thunder)' is the example of शब्दार्थोभयावृत्तिदीपकम्। Here the word मायन्ति and the meaning—getting intoxicated, are both repeated. 48

अस्यैवापरमुदाहरणम्

वदनेन निर्जितं तव निलीयते चन्द्रबिम्बमम्बुधरे।
अरविन्दमपि च सुन्दरि! निलीयते पाथसां पूरे॥

अत्र सुन्दरीवदनेन निर्जितं चन्द्रबिम्बं मेघे निलीयते तिरोभवति, अरविन्दं जलानां पूरे निलीयते तिरोभवतीति 'निलीयते' इति शब्दस्य तिरोधानरूपस्यार्थस्य च आवृत्तेः शब्दार्थोभयावृत्तिदीपकम्।

१७. प्रतिवस्तूपमालङ्कारः

वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता।
तापेन भ्राजते सूरः शूरश्चापेन राजते॥ ४९॥

वाक्ययोः उपमानोपमेयवाक्ययोः एकसामान्ये एकस्मिन् समानधर्मे सति, पृथङ्निर्दिष्टैकसमानधर्मान्वये सति इत्यर्थः, प्रतिवस्तूपमा मता दृष्टा। यत्रोपमानोपमेयघटितवाक्ययोः एकः समानधर्मः शब्दभेदेन पृथङ्निर्दिश्यते तत्र प्रतिवस्तूपमेति निष्कर्षः। प्रतिवस्तु-प्रतिवाक्यार्थं उपमा समानधर्मः अस्यामिति व्युत्पत्तेः अन्वर्थनामा अलंकारः। सूरः सूर्यः तापेन आतपेन भ्राजते, प्रकाशते, शूरः वीरपुरुषः चापेन धनुषा राजते प्रकाशते इत्युदाहरणम्। अत्र भ्राजते, राजते इति भिन्नपदाभ्यां एक एव धर्मः प्रकाशनरूपः उपमानोपमेयघटितवाक्ययोः निर्दिष्टः। सूरः उपमानं, शूरः उपमेयम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

When two sentences (one pertaining to the उपमान and the other to the Upameya) have a common attribute expressed separately by different words, the figure of speech is प्रतिवस्तूपमा। प्रतिवस्तु प्रतिवाक्यार्थे उपमा (समानधर्मः) यस्यां इति प्रतिवस्तूपमा—Where the meanings of two sentences have a common attribute expressed separately by different words it is प्रतिवस्तूपमा। 'The sun shines with his radiance, the hero shines with his bow' is the example. Here the first sentence is the उपमानवाक्य and the second उपमेयवाक्य. Their common attribute—shining is predicated in both the sentences by different words - भ्राजते and राजते। 49

प्रतिवस्तूपमाया अपरमुदाहरणम्

स्थिरा शैली गुणवतां खलयुद्ध्या न बाध्यते।
रत्नदीपस्य हि शिखा वास्त्ययापि न नाश्यते॥

शैली-सद्वृत्तम्। रत्नमेव दीपः रत्नदीपः। पूर्वार्धं उपमेयवाक्यम्, उत्तरार्धं उपमानवाक्यम्। नाशाभावरूपः समानधर्मः उभयत्र शब्दभेदेनोपात्त इति प्रतिवस्तूपमालक्षणसङ्गतिः।

१८. दृष्टान्तालङ्कारः

चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः।
त्वमेव कीर्तिमान् राजन् विधुरेव हि कान्तिमान्॥५०॥

वाक्ययोरित्यनुवर्तते। वाक्ययोः उपमानोपमेयवाक्ययोः बिम्बप्रतिबिम्बत्वं चेत्, भिन्नावेव धर्मौ सादृश्यादभिन्नत्वेन अध्यवसितौ पृथक्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

निर्दिष्टौ चेत् तर्हि दृष्टान्तः अलङ्कृतिः अलङ्कारः । हे राजन् त्वमेव कीर्तिमान्, विधुः चन्द्र एव कान्तिमान् इत्युदाहरणम् । अत्र प्रथममुपमेयवाक्यं, द्वितीयमुपमानवाक्यम् । तयोः कीर्तिमत्वकान्तिमत्वरूपौ धर्मौ बिम्बप्रतिबिम्बभावेन निर्दिष्टौ इति लक्षणसमन्वयः ।

वस्तुतो भिन्नयोः सादृश्यादभिन्नतया अध्यवसितयोः धर्मयोः पृथक् निर्देशः बिम्बप्रतिबिम्बभावः । वस्तुतः अभिन्नस्य (एकस्यैव) धर्मस्य शब्दभेदेन पृथगुपादानं वस्तुप्रतिवस्तुभावः । प्रतिवस्तूपमायाँ वस्तुप्रतिवस्तुभावः, दृष्टान्ते बिम्बप्रतिबिम्बभाव इत्यनयोर्भेदः ।

When two sentences—one dealing with the उपमान and the other with the उपमेय have the semblance of an image (बिम्ब) and its reflection (प्रतिबिम्ब) on account of parallel attributes expressed separately, it is दृष्टान्तालङ्कारः । 'O ! King, you alone are famous and the moon alone is brilliant,' is the example. Here fame and brilliancy are the parallel attributes which make the two sentences look like an image and its reflection.

Both in प्रतिवस्तूपमा and दृष्टान्त, there is complete balance between the two sentences dealing with the Upamāna and Upameya. But in प्रतिवस्तूपमा the same idea (predicated action or धर्म) is conveyed by different words (वस्तुप्रतिवस्तुभावः) while in दृष्टान्त, different ideas which are similar to each other are conveyed by different words (बिम्बप्रतिबिम्बभाव)।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दृष्टान्तस्यापरमुदाहरणम्

कामं नृपाः सन्ति सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम्।
नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः॥

अत्र भूमिः अनेन राज्ञा शोभनराजवती, रात्रिः चन्द्रेण ज्योतिष्मती प्रशस्तज्योतिर्युक्ता इति वाक्यद्वये राजन्वती-ज्योतिष्मतीति भिन्नयोः सदृशयोर्धर्मयोः पृथङ् निर्देशात् बिम्बप्रतिबिम्बभावेन दृष्टान्तालङ्कारः।

१९. निदर्शनालङ्कारः

निदर्शना त्रिविधा—(1) वाक्यार्थवृत्तिः, (2) पदार्थवृत्तिः, (3) सदसदर्थबोधनरूपा चेति। आसां क्रमेण लक्षणोदाहरणानि दीयन्ते।

Nidarsana is of three kinds:-(1) वाक्यार्थवृत्तिः—Resting on the meaning of sentences, (2) पदार्थवृत्ति —Resting on the meaning of a word and (3) सदसदर्थबोधनरूपा—Instruction of a good or bad result. They are defined and illustrated in the same order.

(१) वाक्यार्थवृत्तिः निदर्शना

वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना।
यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता॥ ५१॥

सदृशयोः तुल्ययोः वाक्यार्थयोः ऐक्यारोपः अभेदारोपः (वाक्यार्थवृत्तिः) निदर्शना। दातुः वितरणशीलस्य सौम्यता अपारुष्य-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मिति यत् सा इयं पूर्णेन्दोः अकलङ्कता कलङ्कराहित्यम् इत्युदाहरणम्। यथा पूर्णेन्दोरकलङ्कता असंभाव्या तथा दातुः सौम्यता दुर्लभेतिभावः। यदिति सामान्ये नपुंसकम्। सेयमिति विधेयाभिप्रायेण स्त्रीलिङ्गम्। अत्र दातुः अपरुषत्वरूपोपमेयवाक्यार्थस्य, पूर्णचन्द्रस्य कलङ्कराहित्यरूपोपमानवाक्यार्थस्य च यत्तच्छब्दाभ्यामभेदारोपात् वाक्यार्थवृत्तिनिदर्शना।

रूपके केवलोपमानोपमेययोः अभेदारोपः, निदर्शनायां तु उपमानोपमेयघटितवाक्यार्थयोः अभेदारोप इति भेदः। दृष्टान्ते सदृशयोर्वाक्यार्थयोः बिम्बप्रतिबिम्बभावेन निर्देशः, निदर्शनायां तु ऐक्यारोप इति भेदः।

Where the ideas expressed in two (or more) parallel sentences are figuratively identified, the figure of speech is (वाक्यार्थवृत्तिः) निदर्शना। 'The geniality of the giver is the absence of the dark spot (stain) in the moon' is the example. Here the geniality of the giver is the idea set out in the उपमेयवाक्य and the absence of dark spot in the moon is the idea set out in the उपमानवाक्य। These two ideas are said to be identical by the connecting phrase—'सेयम्'. It means that geniality in the giver is as improbable as the absence of stain in the moon.

In रूपक there is identification of two objects—the Upamāna and Upameya, while in निदर्शना there is identification of ideas conveyed by parallel sentences. In दृष्टान्त there are two parallel sentences but the ideas conveyed are not identified.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वाक्यार्थवृत्तिनिदर्शनायाः अपरमुदाहरणम्

अरण्यरुदितं कृतं शवशरीरमुद्दिश्य
स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितम्।
श्वपुच्छमधनामितं बधिरकर्णजापः कृतो
धृतोऽन्धमुखदर्पणो यदबुधो जनः सेवितः॥

अत्र यदबुधो जनः सेवितः तदरण्यरुदितं कृतमित्यादौ अबुधजनसेवारूपोपमेयवाक्यार्थस्य अरण्यरुदितादिरूपोपमानवाक्यार्थैः अभेदारोपः। अरण्यरुदितादिवद् अबुधजनसेवा निष्फलेति भावः।

(२) पदार्थवृत्तिः निदर्शना

पदार्थवृत्तिमप्येके वदन्त्यन्यां निदर्शनाम्।
त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः॥ ५२॥

एके केचित् पदार्थवृत्तिं एकस्मिन् पदार्थे अन्यपदार्थधर्मस्य आरोपरूपां अन्यामपि निदर्शनां वदन्ति। (हे कान्ते) त्वन्नेत्रयुगलं तव लोचनद्वन्द्वं नीलाम्बुजन्मनोः नीलारविन्दयोः लीलां विलासं धत्ते धरति इत्युदाहरणम्। अत्र कान्तानेत्रयुगले अन्यपदार्थस्य नीलारविन्दयुगलस्य यो धर्मः विलासरूपः तस्य आरोपोऽस्तीति पदार्थवृत्तिनिदर्शना। अत्रारोप्यमाणो धर्मः पदप्रतिपाद्य इति पदार्थवृत्तित्वम्, नीलारविन्दलीलायाः नेत्रे असंभवात् लीलेव लीला इति सदृशधर्मापक्षेपात् आरोपः औपम्ये पर्यवस्यति।

विशिष्टयोर्धर्मयोः ऐक्यारोपो वाक्यार्थवृत्तिनिदर्शना, उपमानोपमेययोरन्यतरस्मिन् अन्यतरधर्मारोपः पदार्थवृत्तिनिदर्शना, इत्यनयोर्भेदः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

Where the attribute of one object उपमान or उपमेय is ascribed to another object (उपमेय or उपमान), some Alankārikas accept another type of निदर्शना। 'The pair of your eyes bears the charm of a pair of blue lotuses' is the example. Here the charm (धर्म) of the blue lotuses उपमान is ascribed to the eyes (उपमेय) and hence this is पदार्थवृत्ति-निदर्शना। Here the attribute of one (लीला) ascribed to another is expressed by a word (पद) and hence पदार्थवृत्ति। In वाक्यार्थ-वृत्ति the identified ideas are conveyed by sentences (वाक्य)

52

पदार्थवृत्तिनिदर्शनाया अपरमुदाहरणम्

वियोगे गौडनारीणां यो गण्डतलपाण्डिमा।
अदृश्यत स खर्जूरीमञ्जरीरागभरेणुषु॥

अत्र अन्यधर्मस्य गौडनारीगण्डपाण्डिम्नः अन्यस्मिन् पदार्थे खर्जूरीमञ्जरीरागभरेणुषु आरोपात्पदार्थवृत्तिनिदर्शना। पूर्वोदाहरणे उपमेये उपमानधर्मारोपः, अत्रतूपमाने उपमेयधर्मारोप इति भेदः। अत्राप्य-न्यधर्मस्य अन्यत्रासंभवात् तत्सदृशधर्मांक्षेपेण औपम्ये पर्यवसानम्।

(३) सदसदर्थबोधनरूपा निदर्शना

अपरां बोधनं प्राहुः क्रियया असत्सदर्थयोः।

क्रियया, (किञ्चित्क्रियाविशिष्टस्य कस्यचित्) स्वक्रियया (परान् प्रति) असतः अदर्थः दोषकलुषस्य, सतः गुणकलस्य वा बोधने ज्ञापने (वर्ण्यमाने) अपरां पूर्वविलक्षणां अन्यां निदर्शनां आहुः। तथा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

चेयमपि द्विविधा—(क) क्रियया असदर्थबोधनरूपा, (ख) क्रियया सदर्थबोधनरूपा चेति। निदर्शयति। (क्रियया) प्रदर्शयतीति निदर्शना।

When a thing is described to give instruction of a harmful or beneficial idea by its action it is another type of Nidarsana निदर्शयति (क्रियया) प्रदर्शयतीति निदर्शना। This also is of two kinds—(a) Instruction of a harmful idea, and (b) Instruction of a beneficial idea.

(क) क्रियया असदर्थबोधनरूपायाः निदर्शनाया उदाहरणम्

नश्येद्राजविरोधीति क्षीणं चन्द्रोदये तमः ॥ ५३ ॥

राज्ञः विरोधी नश्येत् नाशमाप्नुयाद् इति (परान् बोधयन्) चन्द्रोदये तमः अन्धकारः क्षीणं नष्टम् इत्यत्र चन्द्रोदये तमसः क्षयरूप-क्रियया राजविरोधी नश्येदिति दोषफलस्य असदर्थस्य बोधनात् लक्षण-समन्वयः। राजशब्दे श्लेषेण नृपचन्द्रयोः प्रतिपत्तिः।

(a) 'At the rise of the moon darkness disappeared instructing (others by its action) that the offender of the king will perish' is the example of असदर्थबोधननिदर्शना। By its own action of vanishing, the darkness is said to be instructing others of the harmful idea that the king's offender will be ruined. 53.

अस्या एवापरमुदाहरणम्

उन्नतं पदमवाप्य यो लघुः हेलयैव स पतेदिति ब्रुवन्।
शैलशेखरगतः पृषद्गणः चारुमारुतधुतः पतन्यधः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

अत्र पर्वतशिखरगतः वृष्टिबिन्दुः मन्दमारुतमात्रेण अधः पतन्, लाघवयुक्तो यदि उन्नतं पदमारोहति तर्हि अनायासेन अधः पतेदिति क्रियया असदर्थबोधनम् ।

(ख) क्रियया सदर्थबोधनरूपाया निदर्शनाया उदाहरणम्

उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
विभावयन् समृद्धीनां फलं सुहृदनुग्रहः ॥ ५४ ॥

सविता सूर्यः, उदयन्नेव अभ्युदयं प्राप्नुवन्नेव समृद्धीनां सम्पदां फलं सुहृदनुग्रहः इति विभावयन् परान् प्रति बोधयन् पद्मेषु स्वसुहृत्सु श्रियं शोभामर्पयति इत्यत्र पद्मेषु शोभार्षणरूपक्रियया सूर्यः परान् प्रति अहमिवान्योऽपि स्वोदयकाले सुहृद्वर्गः समृद्धिं दद्यात् इति श्रेयस्करमर्थं बोधयतीति वर्णनात् सदर्थबोधनरूपा निदर्शना ।

'Even while rising, the Sun deposits beauty in lotuses instructing (by its action) that the fruit of prosperity is helping the friends' is the example of सदर्थबोधनरूपा निदर्शना । Here instruction on the good idea of helping the friends in prosperity is described to have been given by the Sun through his action of depositing beauty in his friend lotus while rising. 54

अस्या एवापरमुदाहरणम्

चूडामणिपदे धत्ते यो देवं रविमागतम्
सतां कार्यातिथेयीति बोधयन् गृहमेधिनः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र उदयगिरिः प्रातःकाले समागतं सूर्यं शिरसि वहन् गृहस्थैः अतिथीनां सपर्या कर्तव्येति स्वक्रियया बोधयतीति वर्णनात् सदर्थबोधनरूपा निदर्शना।

२०. व्यतिरेकालङ्कारः

व्यतिरेको विशेषश्चेदुपमानोपमेययोः।
शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः॥ ५५॥

उपमानोपमेययोः विशेषः वैलक्षण्यं (वर्णितं) चेत् व्यतिरेकः अलंकारः। सन्तः सज्जनाः शैलाः पर्वता इव उन्नताः (शैलाः आकारे, सन्तस्तु चिते औन्नत्ययुक्ताः), किन्तु (सन्तः) प्रकृत्या स्वभावेन कोमलाः मृदुलाः, (शैलास्तु कठिना इति भावः)। अत्र प्रकृतिकोमला इति उपमानभूतशैलेभ्यः उपमेयभूतसज्जनानां वैलक्षण्यं वर्णितमिति व्यतिरेकलक्षणसमन्वयः।

[व्यतिरेको नाम वैलक्षण्यम्। तच्च कदाचिदुपमानापेक्षया उपमेयस्य आधिक्ये न्यूनतायां अनुभये वा पर्यवस्यति। अत्र उपमेयोत्कर्षपर्यवसायी।]

Where a distinction is pointed out between the Upamāna and the Upameya, the figure of speech is व्यतिरेक। 'Good men are lofty like mountains but are soft by nature' is the example. Here, after comparing the good men with the mountains in the matter of loftiness, a distinction is pointed out in the matter of natural softness of the good.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

[This implies that the mountains are hard and thus results in the superiority of the उपमेय. Sometimes it may result in the inferiority of the उपमेय or neither superiority nor inferiority]

व्यतिरेकस्यापरमुदाहरणम्

पल्लवतः कल्पतरोः एष विशेषः करस्य ते वीर।
भूषयति कर्णमेकः परस्तु कर्णं तिरस्कुरुते ॥

अत्र कल्पतरोः पल्लवः कर्णं भूषयति, (राज्ञः) करस्तु कर्णं राघेयं तिरस्कुरुते (दानातिशयेन) इति उपमानात् पल्लवात् उपमेयस्य करस्य वैलक्षण्यवर्णनाद् व्यतिरेकालङ्कारः। [अयमप्युत्कर्षपर्यवसायी। न्यूनत्वानुभयत्वपर्यवसायिनोः उदाहरणे पुनरनुबन्धे दर्शयिष्येते]

२१. सहोक्त्यलङ्कारः

सहोक्तिः सहभावश्चेद्भासते जनरञ्जनः।
दिगन्तमगमत्तस्य कीर्तिः प्रत्यर्थिभिः सह ॥ ५३ ॥

जनरञ्जनः चमत्कारकारी सहभावः साहित्यं भासते प्रकाशते चेत् सहोक्तिर्नाम अलङ्कारः। सहृदयहृदयाह्लादिसाहित्यवर्णनं सहोक्तिरिति निष्कर्षः। तस्य राज्ञः कीर्तिः प्रत्यर्थिभिः शत्रुभिः सह दिगन्तं अगमत् इत्यत्र कीर्तेः शत्रूणां च दिगन्तगमने साहित्यं चमत्कारितया वर्णितमिति सहोक्तिलक्षणसमन्वयः। राज्ञः प्रतापमसहमानाः शत्रवो यदा दिक्षु पलायितास्तदैव राज्ञः कीर्तिरपि तासु व्याप्तेति सहृदयहृदयाह्लादकारी सहभावो वर्णितः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Where the association of two things is described in a delightful manner, the figure of speech is सहोक्तिः। The fame of that king reached the end of the quarters along with his enemies' is the example, Here the fame and foes of the king are said to have gone to the end of the quarters together. This implies the delightful idea of the foes running with fear and at the same time spreading the fame of the king wherever they go. 56

सहोक्तेरपरमुदाहरणम्

छाया संश्रयते तलं विटपिनां श्रान्तेव पान्थैः समं
मूलं याति सरोजलस्य जडता ग्लानेव मीनैः सह।
आचामत्यहिमांशुदीधितिरपस्तेनेव लोकैः समं
निद्रा गर्भगृहं सह प्रविशति क्लान्तेव कान्ताजनैः॥

अत्र मध्याह्नवर्णने छाया पान्थैः सह तरुतलं संश्रयते, जडता शीतलता मीनैः सह जलाधोभागं गच्छति, सूर्यदीधितिः लोकैः सह जलं पिबति, निद्रा कान्ताजनैः सहाभ्यन्तरगृहं गच्छतीति जनरञ्जनसहभाव-वर्णनात् सहोक्तिः। "अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीदलमर्मरेषु" इत्यादौ सहभावस्य अचमत्कारित्वात् न सहोक्त्यलङ्कारः।

२२. विनोक्त्यलङ्कारः - आद्या विनोक्तिः

विनोक्तिश्चेद्विना किञ्चित्प्रस्तुतं हीनमुच्यते।
विद्या ह्यापि सावद्या विना विनयसंपदम्॥ ५७॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

किञ्चिद्विना प्रस्तुतं वर्ण्यं वस्तुहीनं निकृष्टं उच्यते चेत् विनोक्तिरलङ्कारः। विद्या ह्यद्यापि मनोहरापि विनयसम्पदं विना अवद्या दुष्टा इत्युदाहरणम्। अत्र किञ्चिद्विना विनयसमृद्धिं विना प्रस्तुतस्य विद्यायाः हीनत्वोक्तेः लक्षणसमन्वयः। विनोक्तिः द्विविधा। तत्रेयमाद्या विनोक्तिः।

Where the subject of the context (प्रस्तुत) is described to be defective owing to the absence of something, the figure is Vinokti. 'Learning, though charming, is faulty without modesty' is the example. Here the प्रस्तुत-learning is described as defective in the absence of modesty and hence Vinokti.

57

अस्या अपरमुदाहरणम्

यश्च रामं न पश्येत्तु यं च रामो न पश्यति।
निन्दितः स भवेल्लोके स्वात्माप्येनं विगर्हते॥

अत्र रामदर्शनमप्राप्तवतः हीनत्वं विनाशब्दप्रयोगं विनैव दर्शितमिति पूर्वोदाहरणाद्भेदः। रामदर्शनेन विना पुरुषः निन्दितो भवतीत्यर्थः।

द्वितीया विनोक्तिः

तच्चेत्किञ्चिद्विना रम्यं विनोक्तिः सापि कथ्यते।
विना खलैर्विभात्येषा राजेन्द्र! भवतः सभा॥ ५८॥

तच्छब्देनात्र प्रस्तुतं परामृश्यते। तत् प्रस्तुतं किञ्चिद्विना रम्यं सुन्दरं चेत् सापि विनोक्तिरिति कथ्यते। हे राजेन्द्र! भवतः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सभा खलैर्विना दुर्जनैर्विना विभाति इत्यत्र सभायाः खलसंपर्कं विना रम्यत्ववर्णनाद् द्वितीया विनोक्तिः ।

Where the subject of the context is described as attractive by the absence of something, ft is another type of Vinokti, 'O King! this assembly of yours shines by the absence of (without) wicked men' is the example. Here the subject of the context— सभा is said to benefit (become attractive) by the absence of bad men and hence this is an example of the second variety of विनोक्तिः । 58

अस्या अपरमुदाहरणम्

आविर्भूते शशिनि तमसा मुच्यमानेव रात्रिः
नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा ,
मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा
गङ्गा रोधःपतनकलुषा गृह्णतीव प्रसादम् ॥

अत्र तमसा विना रात्रेः, धूमेन विना हुतभुजः, मोहेन विना तन्व्याः, कालुष्येण विना गङ्गायाश्च रम्यता क्त्वाशब्दप्रयोगं विनैव बोधितेति पूर्वोदाहरणाद्भेदः ।

२३. समासोक्त्यलङ्कारः

समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् ।
अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः ॥ ५९ ॥

प्रस्तुते प्रस्तुतवृत्तान्ते वर्ण्यमाने विशेषणसाम्यात् अप्रस्तुतस्य अप्रस्तुतवृत्तान्तस्यापि परिस्फूर्तिः प्रतीतिः चेत् समासोक्तिरलङ्कारः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

समासेन संक्षेपेण प्रस्तुताप्रस्तुतयोः उक्तिरित्यन्वर्थसंज्ञा। अयं रक्तः चन्द्रमाः ऐन्द्र्याः प्राचीदिशः मुखं प्रारम्भभागं चुम्बति स्पृशति पश्य, इत्युदाहरणम्। अत्र चन्द्रोदयवर्णने प्रस्तुते रक्तादिविशेषणसाम्यात् नायिकानायकवृत्तान्तस्याप्रस्तुतस्य प्रतीतेः लक्षणसमन्वयः। तथाहि रक्तशब्दस्य श्लेषेण लोहितानुरक्तसाधारण्यात्, मुखशब्दस्य प्रारम्भवदनसाधारण्यात्, चुम्बतीत्यस्य संस्पर्शवदनसंयोगसाधारण्यात्, 'चन्द्रमाः' शब्दगतपुंलिङ्गेन, 'ऐन्द्री' शब्दगतस्त्रीलिङ्गेन तत्प्रतिपाद्येन्द्रसम्बन्धित्वेन च पूर्ववनितासक्तकामुकवृत्तान्तः प्रतीयते, स च प्रतीतोऽर्थः प्रस्तुतमेव चन्द्रोदयवृत्तान्तं उपस्करोति इत्यलङ्कारत्वम्। समासोक्तौ अप्रस्तुतव्यवहारसमारोपः, रूपके तु अप्रस्तुतरूपसमारोप इति भेदः।

Where, from the description of the relevant object the picture of a non-relevant incident (अप्रस्तुतवृत्तान्त) is suggested by the force of adjectives that are applicable to both, the figure of speech is समासोक्तिः। समासेन उक्तिः समासोक्तिः = Telling briefly. Here two incidents are conveyed while only one is expressly described. 'Look, the yonder moon is kissing the face of the eastern quarter' is the example. Here, in the context, the rising moon illuminating the eastern quarter is described, but by the force of the adjective रक्त which means red and a lover, the word मुख which means beginning (front portion) and the face, the word चुम्बति which applies to both touching

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

and kissing and by virtue of the masculine gender in चन्द्रमाः and the feminine gender in ऐन्द्री and its meaning इन्द्रस्य इयं belonging to Indra, the non-relevant incident of a lover kissing the face of a woman belonging to another is suggested. This suggested idea again beautifies the expressed idea and hence this is समासोक्तयलङ्कारः। In Rūpaka, the quality of a non-relevant object is ascribed to the relevant object (अप्रस्तुतरूपसमारोप) while in Samāsokti the picture of a non-relevant incident is ascribed to the relevant incident (अप्रस्तुतव्यवहारसमारोप). 59

समासोक्तेः अपरमुदाहरणम्

व्यावल्गत्कचभारमाकुलकच व्यालोलहारावलि
प्रेङ्खत्कुण्डलशोभिगण्डयुगलं प्रस्वेदिवक्त्राम्बुजम्।
शश्वद्दत्तकरप्रहारमधिकश्वासंरसादेतया
यस्मात्कन्दुक! सादरं सुभगया संसेव्यसे तत्कृती॥

अत्र कन्दुककीडावृत्तान्ते वर्ण्यमाने 'व्यावल्गत्कुचभारं' इत्यादिक्रियाविशेषणसाम्यात् विपरीतरतासक्तनायिकावृत्तान्तः प्रतीयते। पूर्वोदाहरणे विशेषणानि श्लिष्टानि, अत्र तु श्लेषं विनैव प्रकृताप्रकृतयोरनुगतानि इति भेदः। सारूप्यादप्रस्तुतवृत्तान्तप्रतीतेरुदाहरणमनुबन्धे द्रष्टव्यम्।

२४ परिकरालङ्कारः

अलङ्कारः परिकरः साभिप्राये विशेषणे।
सुधांशुकलितोत्तंसः तापं हरतु वः शिवः॥ ६०॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विशेषणे साभिप्राये सति, प्रकृतार्थोपपादकत्व अर्थविशेषस्य व्यञ्जकत्वाभिप्रायेण विशेषणप्रयोगे सति, परिकरो नाम अलङ्कारः। अत्र विशेषणे इत्येकवचनमविवक्षितम्। व्यङ्ग्यस्यार्थस्य वाच्यार्थं प्रति परिकरत्वात् अङ्गत्वात् परिकरालङ्कार इति व्यपदेशः। सुधांशुना कलितः कृतः उत्तंसःशिरोभूषणं येन सः शिवः वः युष्माकं तापं दुःखं हरतु इत्युदाहरणम्। अत्र सुधांशुकलितोत्तंस इति विशेषणं प्रकृततापहरणरूपार्थोपादकत्वेन साभिप्रायं प्रयुक्तम्। सुधांशोर्हि तापहरणसामर्थ्यं उपपन्नं तद्विशिष्टश्च शिवः मनस्तापं हरतु इति प्रकृतार्थोपकारकत्वं व्यज्यमानस्यार्थस्येति लक्षणसङ्गतिः।

When the adjectives are suggestive of a meaning capable of substantiating the expressed idea, the figure of speech is परिकरः। 'May Siva who has the noon (nectar rayed) as his head-ornament remove your mental agony (heat)' is the example. Here the adjective सुधांशुकलितोत्तंस is suggestive of the presence of neetar which, in turn, supports the expressed idea of removing the mental affliction. The nectar is well-known to poseess the power of removing ताप and hence a reference to it helps in justifying the expressed idea of तापहरण. 60

परिकरस्यापरमुदाहरणम्

तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा।
कुर्यां हरस्यापि पिनाकपाणेः धैर्यच्युतिं कें मम धन्विनोऽन्ये॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र पिनाकपाणेरिति विशेषणं शिवस्य प्रबलायुधत्वं, कुसुमायुध इति विशेषणं मन्मथस्य निस्सारायुधत्वं च द्योतयतः। तेन च कैमुतिक-न्यायेन पिनाकपाणेरपि धैर्यच्युतिं कुर्या, किमुत वक्तव्यमन्यधन्विना-मिति सर्वधन्विधैर्यभङ्गकत्वरूपो वाच्यार्थ एवोपस्कृत इति परि-करालङ्कारः।

२५ परिकराङ्कुरालङ्कारः

साभिप्राये विशेष्ये तु भवेत्परिकाराङ्कुरः।
चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः॥ ६१ ॥

विशेष्ये साभिप्राये सति प्रकृतार्थसंपादनसमर्थार्थव्यञ्जके सति परिकराङ्कुरो नामालंकारः। चतुर्णां पुरुषार्थानां धर्मार्थकाममोक्षाणां दाता देवः चतुर्भुजः विष्णुः इत्यत्र चतुर्भुज इति विशेष्यपदं पुरुषार्थ-चतुष्टयदानसामर्थ्याभिप्रायेण प्रयुक्तमिति परिकराङ्कुरस्य उद्दाहरणमिदम्।

Where the chief noun is used suggestive of a meaning substantiating the expressed idea, the figure of speech is परिकराङ्कुरः। 'The God with four hands, Vishnu, is the giver of the four aims of life' is the example. Here the chief noun चतुर्भुज suggests the capacity to give the four aims of life and thus supports the expressed idea and hence परिकराङ्कुरालङ्कारः। 61

परिकराङ्कुरस्यापरमुदाहरणम्

फणीन्द्रस्ते गुणान्वक्तुं लिखितुं हैहयाधिपः।
द्रष्टुमाखण्डलः शक्तः काहमेष क ते गुणाः॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र फणीन्द्रहैहयाधिपाखण्डलपदैः विशेष्यवाचकैः व्यज्यमानाः सहस्रवदनत्वसहस्रबाहुत्वसहस्रनयनत्वरूपाः अर्थाः प्रकृतगुणवर्णनलेखन-दर्शनसामर्थ्यापादकतया साभिप्राया इति परिकराङ्कुरालङ्कारः ।

२६ श्लेषालङ्कारः

नानार्थसंश्रयः श्लेषः वर्ण्यावर्ण्योभयाश्रयः ।

नानार्थसंश्रयः अनेकार्थगोचरः शब्दविन्यासः श्लेष इति लक्षणम् । स च त्रिविधः-(१) वर्ण्याश्रयः प्रकृतानेकार्थविषयशब्द-विन्यासरूपः प्रकृतश्लेषः (२) अवर्ण्याश्रयः अप्रकृतानेकार्थविषयशब्द-विन्यासरूपः अप्रकृतश्लेषः (३) उभयाश्रयः प्रकृताप्रकृतानेकार्थगोचरः शब्दविन्यासः प्रकृताप्रकृतश्लेष इति । एतेषां क्रमेणोदाहरणानि दीयन्ते ।

Where words intended to convey more than one meaning are used, the figure of speech is श्लेष, It is of three kinds—(1) प्रकृतश्लेषः:— Where the meanings conveyed are all relevant, (2) अप्रकृतश्लेषः—Where all are non-relevant and (3) प्रकृताप्रकृतश्लेषः—Where one meaning relates to the relevant and the other to the non-relevant.

(१) प्रकृतश्लेषस्य उदाहरणम्

सर्वदो माधवः पायात् स योऽगं गामदीधरत् ॥६२॥

सर्वं ददातीति सर्वदः सकलीभीष्टप्रदाता, मायाः लक्ष्म्या धवः पतिः विष्णुः यः अगं पर्वतं गोवर्धनं, गां पृथिवीं च अधीधरत् धृतवान्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सः पायात् रक्षेत् इत्येकः प्रकृतार्थः । सर्वदा उमायाः, धवः शिवः, यः गङ्गामधीधरत् सः पायादिति द्वितीयोऽप्यर्थः प्रकृत एवेति प्रकृतश्लेषः ।

'May the husband of Lakshmi, Lord Vishnu who is the giver of all things and who lifted the mountain (गोवर्धन) and the earth protect you' is one meaning. 'May the husband of Parvati (Siva) who carried the Ganges (on his head) protect You' is the other meaning. Here the prayer is addressed both to Vishnu and Siva and the words सर्वदो माधवः and योऽगं गाम् are used in such away as to convey two meanings which are both relevant. Therefore this is an example of प्रकृतश्लेष । 62

अस्यैवापरमुदाहरणम्

त्रातः काकोदरो येन द्रोग्धापि करुणात्मना ।
पूतनामारणख्यातः स मेऽस्तु शरणं प्रभुः ॥

येन करुणात्मना रामेण अदरः भयरहितः द्रोग्धापि काकोदरः रक्षितः, पूतनामा पवित्रनामधेयः रणे युद्धे ख्यातः सः मे शरणम्, येन काकोदरः सर्पः (काळियः) रक्षितः, पूतनायाः मारणेन ख्यातः सः कृष्णः मे शरणम् इत्यत्र उभयोरपि रामकृष्णयोः स्तोतव्यत्वेन प्रकृतत्वात् प्रकृतश्लेषः ।

(२) अप्रकृतश्लेषस्योदाहरणम्

अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तव मुखं हरिणा सूर्येण आहितसक्तिना कृतासक्तिना अब्जेन पद्मेन तुल्यम् इत्येकोऽर्थः । त्वन्मुखं हरिणेन मृगेण आहितसक्तिना कृतसङ्गेन अब्जेन चन्द्रेण तुल्यमिति द्वितीयोऽर्थः । उभयोरपि पद्म-चन्द्रयोः उपमानत्वेन अप्रकृतत्वाद् अप्रकृतश्लेषः ।

[अब्ज means the lotus and the moon. हरिणाहितसक्तिना is split in two ways - हरिणा (सूर्येण) आहिता सक्तिः यस्य तेन with reference to the lotus and हरिणेन (मृगेण) आहिता सक्तिः यस्य तेन with reference to the moon.] 'Your face is similar to the lotus which is attached to the Sun' is one meaning. 'Your face is similar to the moon who bears the deer' is another meaning. Here both the lotus and the moon are Upamānas and hence this is an example of अप्रकृतश्लेष ।

अस्यैवापरमुदाहरणम्

नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः ।
सदृशे वनवृद्धानां कमलानां त्वदीक्षणे ॥

तव ईक्षणे लुब्धैः मधुलोलुपैः भूरिशिलीमुखैः बहुभिः भ्रमरैः आकुलीभावं नीतानां वने जले वृद्धानां वृद्धिं प्राप्तानां कमलानां पद्मानां सदृशे, लुब्धैः व्याधैः शिलीमुखैः बाणैः आकुलीभावं नीतानां वने अरण्ये वृद्धानां हरिणानां सदृशे इति पद्महरिणयोः उपमानत्वेनाप्रकृत-त्वाद् अप्रकृतश्लेषः । "मृगप्रभेदे कमलः" इति विश्वः ।

(३) प्रकृताप्रकृतश्लेषस्य उदाहरणम्

उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः ॥ ६३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

उच्चरद् उद्गच्छत् भूरि कीलालं शोणितं यस्य सः वाहिनीपतिः सेनापतिः शुशुभे इति प्राकरणिकार्थः। उच्चरद् भूरि कीलालं उदकं यस्य सः वाहिनीनां नदीनां पतिः समुद्रः शुशुभे इत्यप्राकरणिकार्थः। तथा च श्लिष्टपदानां प्रकृताप्रकृतार्थगोचरत्वात् प्रकृताप्रकृतश्लेषः। (अत्र प्रकृताप्रकृतयोः सादृश्यं प्रतीयते)

कीलालं means blood and water. वाहिनीपतिः means the commander of the army and the ocean. 'The commander of the army shone with blood flowing profusely' is the meaning in the context. The ocean shone with the water (waves) rising high' is the other meaning which is non-relevant. Since the words convey a relevant and a non-relevant meaning, this is an example of प्रकृताप्रकृतश्लेष। (Similarity between the प्रकृत and अप्रकृत is suggested here)

अस्यैवापरमुदाहरणम्

असावुदयमारूढः कान्तिमान् रक्तमण्डलः।
राजा हरति लोकस्य हृदयं मृदुलैः करैः॥

अत्र उदयमभिवृद्धिं प्राप्तो रक्तमण्डलः अनुरक्तप्रजः राजा नृपतिः मृदुलैः करैः अल्पैः ग्राह्यधनैः लोकहृदयं हरति आवर्जयतीति प्राकरणिकार्थः। उदयगिरिमारूढः अरुणमण्डलो राजा चन्द्रः मृदुकिरणैः जनहृदयमाकर्षतीति अप्राकरणिकार्थः। श्लिष्टपदानां प्रकृताप्रकृतार्थगोचरत्वात्प्रकृताप्रकृतश्लेषः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

[इदमत्रावधेयम् - सर्वदो माधवः', 'योऽगंगाम्', 'हरिणाहितसक्तिना' इत्यादौ परस्परविलक्षणं पदभङ्गमपेक्ष्य नानार्थबोधनात् सभङ्गश्लेषः। 'अब्ज - कीलाल - वाहिनीपति' प्रभृतिषु पदेषु तादृशपदभङ्गमनपेक्ष्यैव नानार्थबोधनाद् अभङ्गश्लेषः इति प्रकारान्तरेणापि श्लेषस्य द्वैविध्यम्।

प्रकृताप्रकृतश्लेषे अप्रकृतार्थस्य व्यङ्ग्यत्वमिति केषांचिन्मतम्। अन्ये तु तस्यापि वाच्यत्वमङ्गीकृत्य प्रकृताप्रकृतयोरभेदः सादृश्यं वा व्यङ्ग्यमिति वदन्ति। अत्र प्रथममते प्रकृताप्रकृतश्लेषः नोदाहर्तव्यः। द्वितीयमते शब्दशक्तिमूलवस्तुध्वनिः नोदाहर्तव्यः।]

२७ अप्रस्तुतप्रशंसालङ्कारः

अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया।
एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते॥ ६४॥

अप्रस्तुतस्य प्रशंसा वर्णनं यत्र प्रस्तुताश्रया प्रस्तुतवृत्तान्तावगतिपर्यवसायिनी सा अप्रस्तुतप्रशंसा। यत्र प्रस्तुतवृत्तान्तावगमनोद्देशेन अप्रस्तुतवृत्तान्तो वर्ण्यते तत्र अप्रस्तुतप्रशंसा इति निष्कर्षः। शकुन्तेषु पक्षिषु मध्ये यः शक्राद् अन्यं इन्द्रादन्यं प्रभुं न याचते स एकः चातक एव कृती कुशलः इत्युदाहरणम्। अत्र सार्वभौमं विना अन्यं क्षुद्रं प्रभुं न प्रार्थये इत्यभिमानशालिनो वृत्तान्तस्य प्रस्तुतस्य प्रत्यायनार्थं तत्सदृशचातकवृत्तान्तो वर्णित इति लक्षणसङ्गतिः।

अप्रस्तुतेन प्रस्तुतावगतिः प्रस्तुताप्रस्तुतयोः संबन्धे सति भवति। संबन्धश्च सारूप्यं, सामान्यविशेषभावः, कार्यकारणभावो वा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

संभवति। 'एकः कृती' इत्यदि सारूप्यनिबन्धनायाः अप्रस्तुतप्रशंसाया उदाहरणम्। सामान्यविशेषभावे सामान्याद्विशेषस्य, विशेषात्सामान्यस्य वा अवगतिरिति द्वैविध्यम्। एवं कार्यकारणभावेऽपि कार्यात्कारणस्य, कारणात् कार्यस्य वा अवगतिरिति द्वैविध्यम्। एतेषां चतुर्णां उदाहरणानि अनुबन्धे द्रष्टव्यानि।

समासोक्तौ श्लिष्टविशेषणबलात् प्रस्तुतादप्रस्तुतवृत्तान्तावगतिः, अप्रस्तुतप्रशंसायां सारूप्यादिसंबन्धेन अप्रस्तुतात् प्रस्तुतप्रतीतिः इत्यनयोर्भेदः।

Where a non-relevant object is described with a relevant thing in the mind, it is अप्रस्तुतप्रशंसा। This is just the opposite of समासोक्ति। 'Among the birds, the one (चातक) who does not beg anyone except Indra, is clever' is the example. Here the poet has in mind a man of self-respect who would not beg any ordinary person but only the king. The idea of such a person is brought to the mind by the description of the non-relevant चातक bird which begs only the cloud for water.

In समासोक्ति the picture of the non-relevant is presented to the mind by the power of the adjectives while in अप्रस्तुतप्रशंसा the idea of the relevant thing is brought to the mind by means of - सारूप्य similarity, सामान्य-विशेषभाव - the relationship between the general and the particular, or कार्यकारणभाव the relationship between the

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

cause and effect. Thus there are five sub-divisions of अप्रस्तुतप्रशंसा। In the illustration givin above, the idea of the relevant thing is brought about by the force of similarity. Illustrations of the other sub-divisions are given in the Appendix. 64

अप्रस्तुतप्रशंसाया अपरमुदाहरणम्

आबद्धकृत्रिमसटाजटिलांसभित्तिः
आरोपितो मृगपतेः पदवीं यदि श्वा।
मत्तेभकुम्भपटपाटनलम्पटस्य
नादं करिष्यति कथं हरिणाधिपस्य॥

अत्र मृगपतेः पदमारोपितोऽपि श्वा सिंहस्य नादं न करिष्यतीति अप्रस्तुतशुनकवृत्तान्तवर्णनं तत्सारूप्यात् कृत्रिमवेषव्यवहारमात्रेण विद्वज्जनवदभिनयतो मूर्खस्य वृत्तान्ते पर्यवस्यतीत्यप्रस्तुतप्रशंसा।

२८. प्रस्तुताङ्कुरालङ्कारः

प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः।
किं भृङ्ग सत्यां मालत्यां केतक्या कण्टकेद्धया॥६५॥

प्रस्तुतेन वर्ण्यमानेन अन्यस्यार्थस्यमितस्य प्रस्तुतस्यैव द्योतने प्रस्तुताङ्कुरो नामालङ्कारः। हे भृङ्ग मालत्यां सत्यां विद्यमानायां कण्टकेद्धया कण्टकैर्व्याप्तया केतक्या किं इत्युदाहरणम्। अत्र प्रियतमेन साकं उद्याने विहरन्त्याः बहुदोषयुक्तपरवनितासङ्गाद्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कान्तं निवर्तयितुमिच्छन्त्याः कुलवनितायाः वचने वाच्यार्थस्य भृङ्गोपालम्भस्य, द्योत्यस्य परवनितासक्तप्रियोपालम्भरूपार्थस्य च प्रस्तुतत्वमेवेति लक्षणसमन्वयः।

प्रस्तुताङ्कुरस्यापरमुदाहरणम्

अन्यासु तावदुपमर्दसहासु भृङ्ग
लोलं विनोदय मनः सुमनोलतासु।
बालामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमल्लिकायाः॥

अत्रापि भृङ्गोपालम्भस्य वाच्यार्थस्य तथा प्रौढाङ्गनासु सतीषु बालिकां रतये क्लेशयतः कामिनः उपालम्भरूपद्योत्यार्थस्य च प्रस्तुतत्वात् प्रस्तुताङ्कुरालङ्कारः।

[अनयोरुदाहरणयोः वाच्यार्थस्य प्रस्तुतत्वेन तत्राभिधायाः विश्रान्तेः अर्थसौन्दर्यबलाद्विवक्षितार्थप्रतीतिर्ध्वनिरेव, न अलङ्कारः; यत्र प्रतीयमानस्य वाच्यार्थोपस्कारकत्वं तत्रैवालङ्कारत्वम् इति केचित्। तन्मते इदं वक्ष्यमाणं प्रस्तुताङ्कुरालङ्कारस्यं उदाहरणम्—

कोशद्वन्द्वमियं दधाति नलिनी कादम्बचञ्चुक्षतं
धत्ते चूतलता नवं किसलयं पुंस्कोकिलास्वादितम्।
इत्याकर्ण्य मिथः सखीजनवचः सा दीर्घिकाया स्तटे
चेलान्तेन तिरोदधे स्तनतटं बिम्बाधरं पाणिना॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इयं नलिनी हंसचञ्चुक्षतं मुकुलद्वन्द्वं धत्ते, तथा इयं चूतलता केकिलास्वादितं नवं किसलयं धत्ते इति वापीतटे सखीजनस्य परस्परालापं श्रुत्वा प्रस्तुता नायिका कमलमुकुलचूतपल्लवव्याजेन आत्मनः स्तनाधरक्षतवृत्तान्तं कथयतीति ज्ञात्वा स्तनतटं वस्त्रान्तेन, अधरं च पाणिना तिरोदधे इत्यत्र व्यङ्ग्यार्थस्य प्रस्तुतान्तरस्य स्वयमेव कविना उत्तरार्धे आविष्कृतत्वात् अलङ्कारत्वम्। तथाचोक्तं ध्वन्यालोके—

शब्दार्थशक्त्या वाक्षिप्तो व्यङ्ग्योऽर्थः कविना पुनः।
यत्राविष्क्रियते स्वोक्त्या सान्यैवालङ्कृतिर्ध्वनेः॥

२९. पर्यायोक्तालङ्कारः—प्रथमं पर्यायोक्तम्

पर्यायोक्तं तु गम्यस्य वचो भङ्ग्यन्तराश्रयम्।
नमस्तस्मै कृतौ येन मुधा राहुवधूकुचौ॥ ६६॥

गम्यस्य विवक्षितस्य अर्थस्य भङ्ग्यन्तराश्रयं वचः विवक्षितादपि चारुतरेण प्रकारेण अभिधानं पर्यायोक्तम्, पर्यायेण भङ्ग्यन्तरेण उक्तं अभिहितं विवक्षितं यत्र इति व्युत्पत्तेः। येन राहुवधूकुचौ मुधा व्यर्थौ कृतौ, राहोः शिरोमात्रावशेषत्वकरणात्, तस्मै वासुदेवाय नमः इत्युदाहरणम्। अत्र स्वासाधारणरूपेण वासुदेवत्वेन गम्यस्य भगवतः भङ्ग्यन्तरेण राहुवधूकुचवैयर्थ्यकारित्वेन अभिधानात् पर्यायोक्तलक्षणसमन्वयः।

Where the idea intended to be conveyed is expressed in a more figurative manner, the figure of speech is पर्यायोक्तम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

'I salute him who made the breasts of Rahu's wife purposeless' is the example. Here the idea of Vasudeva intended to be conveyed in his distinct form is expressed figuratively as one who made the breasts of Rahu's wife useless and hence पर्यायोक्तम्। 66

अस्यैवापरमुदाहरणम्

लोकं पश्यति यस्याङ्घ्रिः स यस्याङ्घ्रिं न पश्यति।
ताभ्यामप्यपरिच्छेद्या विद्या विश्वगुरोस्तव॥

यस्याक्षपादस्य अङ्घ्रिः लोकं पश्यति स च लोकः यस्य पतञ्जलेः (आदिशेषावतारस्य) अङ्घ्रिं न पश्यति ताभ्यां गौतम-पतञ्जलिभ्यां विश्वगुरोस्तव विद्या अपरिच्छेद्या इत्यत्र स्वासाधारणरूपाभ्यां अक्षपादत्वपतञ्जलित्वाभ्यां गम्यौ रूपान्ताभ्यामभिहिताविति पर्यायोक्तम्।

द्वितीयं पर्यायोक्तम्

पर्यायोक्तं तदप्याहुः यद् व्याजेनेष्टसाधनम्।
यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह॥ ६७॥

व्याजेन कार्यान्तरच्छलेन इष्टस्यार्थस्य स्वस्य परस्य वा इष्टस्य कार्यस्य साधनमिति यत् तदपि पर्यायोक्तं आहुः। कार्यान्तरव्याजेन इष्टकार्यसाधनं द्वितीयं पर्यायोक्तमिति निष्कर्षः। अहं चूतलतां द्रष्टुं यामि गच्छामि, युवाभ्यां इह अत्रैव आस्यतां स्थीयतां इत्युदाहरणम्। अत्र स्वसन्निधौ लज्जमानयोः नायिकानायकयोः विहाराय विविक्तता-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

संपादनमिच्छन्ती सखी चूतलतादर्शनव्याजेन स्वाभीष्टं नायिकानायिकयोरिष्टं वा साधयतीति द्वितीयपर्यायोक्तलक्षणसमन्वयः।

Where the fulfilment of one's desire is described to have been achieved under a delightful protext, it is yet another kind of Paryayoktam. 'I go to see the mango plant, you two remain here' is the example. This is said by a friend (सखी, who has brought about the union of the lovers and who wishes to provide privacy to them. That she does under the clever pretext of going to see the mango tree. 67

अस्यापरमुदाहरणम्

देहि मत्कन्दुकं राधे परिधाननिगूहितम्।
इति विस्रंसयन्नीवीं तस्याः कृष्णो मुदेऽस्तु नः॥

अत्र कन्दुकसद्भावशोधनार्थं नीवीविस्रंसनव्याजेन कृष्णः स्वाभीष्टं साधयतीति द्वितीयं पर्यायोक्तम्।

३०. व्याजस्तुत्यलङ्कारः

उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः।

निन्दास्तुतिभ्यां स्तुतिनिन्दयोः उक्तिः अभिव्यक्तिः व्याजस्तुत्यलङ्कारः। निन्दाव्याजेन स्तुतेः, स्तुतिव्याजेन निन्दायाश्चावगमने व्याजस्तुतिरिति निष्कर्षः। तथा च व्याजस्तुतिः द्विविधा— (1) निन्दया स्तुतिः, (2) स्तुत्या निन्दा चेति। क्रमेण, व्याजेन

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(निन्दाव्याजेन) स्तुतिः, व्याजरूपा स्तुतिः इति च व्युत्पत्तिर्व्याज-स्तुतिशब्दस्य बोध्या।

Where praise is expressed (suggested) by apparent censure or censure is expressed (suggested) by apparent praise, the figure of speech is व्याज स्तुतिः। व्याजेन (निन्दाव्याजेन) स्तुतः, व्याजरूपा स्तुतेः वा व्याजस्तुतिः। Thus व्याजस्तुति is of two kinds (1) Praise by apparent censure and (2) Censure by apparent praise.

(१) निन्द्यया स्तुतेरवगमनरूपायाः व्याजस्तुतेः उदाहरणम्

कः स्वर्धुनि विवेकस्ते नयसे पापिनो दिवम् ॥ ६८ ॥

हे स्वर्धुनि गङ्गे ते विवेकः कः? नास्ति ते विवेकः (यस्मात्) त्वं पापिनः दिवं स्वर्गं नयसे इत्यत्र तव विवेको नास्तीति निन्दाव्याजेन महापातकिनामपि पापप्रशमनेन स्वर्गप्रदानशक्तेति गङ्गायाः प्रभावाति-शयस्तुतिरेव क्रियत इति व्याजस्तुतिः।

'O! Ganges, what sort of wisdom is yours? (you have no wisdom because) you lead sinners to heaven' is the example of the first variety of व्याजस्तुति। Here the Ganges is apparently censured for lack of wisdom but really it is a praise of her power to remove the sins and give happiness even to the worst sinners. 68

अस्याः अपरमुदाहरणम्

कस्ते शौर्यमदो योद्धुं त्वय्येकं समुपस्थिते।
सप्तसप्तिमरूढा भवन्ति परिपन्थिनः॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र योद्धृ राज्ञि एकाश्वममारूढे सति तच्छत्रवः सप्ताश्वमारूढाः भवन्ति, तस्मात् मास्तु राज्ञः शौर्यमद इति निन्दाव्याजेन राज्ञा युद्धे हताः सूर्यमण्डलं भित्त्वा दिवं गच्छन्तीति शौर्यस्तुतिरेव क्रियत इति निन्दया स्तुतिरूपा व्याजस्तुतिः। सप्त सप्तयः अश्वाः यस्य सः सूर्यः, सप्त च ते सप्तयश्च इत्युभयथा योजना।

(२) स्तुत्या निन्दापर्यवसानरूपायाः व्याजस्तुतेः उदाहरणम्

साधु दूति पुनः साधु कर्तव्यं किमतः परम्।
यन्मदर्थे विलूनासि दन्तैरपि नखैरपि ॥ ६९ ॥

हे दूति साधु, पुनः साधु (त्वया प्रशंसार्हं किमपि कृतं, तस्मात्) श्लाघनीयासि। अतः परं कर्तव्यं किमस्ति? यद्यस्मात् त्वं मदर्थं नखैः दन्तैश्च विलूना विदारिता असि इत्यत्र नायकं समानेतुं प्रेषिता दूती स्वयं तत्सम्भोगमनुभूय समागता शरीरे परिदृश्यमानदन्तनखक्षतैः ज्ञाततत्त्वया नायिकया एवं स्तुतिव्याजेन निन्द्यते। तस्मात् स्तुत्या निन्दापर्यवसायिनी व्याजस्तुतिरियम्।

'Well done, O go-between well done, what more could have been done than this. On my account (for helping me), you have been wounded by teeth and nails' is the example of the second variety of व्याजस्तुति. Here censure is meant by apparent praise. This is said by the heroine to her female messenger who was sent to fetch her lover, but who returned after enjoying his company

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

bearing the marks of enjoyment on her person. Here the apparent praise 'well done, what more could have been done than this' is really meant to censure her for misconduct. 69

अस्या अपरमुदाहरणम्

अर्धं दानववैरिणा गिरिजयाप्यर्धं शिवस्याहृतं
देवेत्थं जगतीतले स्मरहराभावे समुन्मीलति।
गङ्गासागरमम्बरं शशिकला नागाधिपः क्ष्मातलं
सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां, मां च भिक्षाटनम्॥

अत्र हरिपार्वतीभ्यामपहृतविग्रहस्य ईश्वरस्य सर्वज्ञत्वमधीश्वरत्वं च त्वामगमत्, भिक्षाटनं तु माम् इति राजानं स्तुवन्निव अर्थी, सर्वज्ञः सर्वेश्वरोऽपि च सन् मदीयं वैदुष्यं दारिद्र्यं च ज्ञात्वा न किमपि भद्रं ददासीति राज्ञः निन्दामेव करोति इति व्याजस्तुतिः।

३१. व्याजनिन्दालङ्कारः

निन्दाया निन्दया व्यक्तिः व्याजनिन्देति गीयते।
विधे! स निन्द्यो यस्ते प्रागेकमेवाहरच्छिरः॥ ७०॥

निन्दया अन्यनिन्दया निन्दायाः अन्यनिन्दायाः व्यक्तिः अभिव्यक्तिः व्याजनिन्दाख्यालङ्कारः। हे विधे ब्रह्मन् यः हरः प्राक् ते एकमेव शिरः अहरत् सः निन्द्यः इत्युदाहरणम्। अत्र हरनिन्दया दारुणविपाकं संसारं प्रवर्तयतः ब्रह्मण एव निन्दा विवक्षिता गम्यते इति व्याजनिन्दालङ्कारः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

व्याजनिन्दाया अपरमुदाहरणम्

विधिरेव विशेषगर्हणीयः कटु त्वं रट, कस्त्वयापराधः।
सहकारतरौ चकार यस्ते सहवासं सरलेन कोकिलेन॥

अत्र विधिनिन्दया कर्णकठोरं रटन् काको निन्द्यते इति व्याजनिन्दा।

३२. आक्षेपालङ्कारः—प्रथमः आक्षेपः

आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्।
चन्द्र संदर्शयात्मानम् अथवास्ति प्रियामुखम्॥ ७१॥

स्वयमुक्तस्य अर्थस्य विचारणात् किञ्चिन्निमित्तमभिसन्धाय प्रतिषेधः आक्षेपो नामालङ्कारः। हे चन्द्र! आत्मानं संदर्शय, अथवा प्रियायाः मुखं अस्ति इत्युदाहरणम्। अत्र चन्द्रदर्शनमादौ प्रार्थितम्। तदनन्तरं प्रियामुखस्य आह्लादकारिणः सत्वात् चन्द्रदर्शनस्यानर्थक्यं विचार्य अथवेति पक्षान्तरेण निषेधमूचनादाक्षेपालङ्कारलक्षणसमन्वयः।

Where a certain direction is first given and then dispensed with on a better consideration of certain circumstances, the figure of speech is आक्षेप। 'O Moon' show thyself. Nay, there is the face of my beloved' is the example. Here the moon is first called upon to appear and then, on better consideration, it is dispensed with because there is the beloved's face to serve the purpose. 71

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रथमाक्षेपस्य अन्यदुदाहरणम्

साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः।
यत्तस्य दैत्या इव लुण्ठनाय काव्यार्थचोराः प्रगुणीभवन्ति॥
गृह्णन्तु सर्वे यदि वा यथेच्छं, नास्ति क्षतेः कापि कवीश्वराणाम्।
रत्नेषु लुप्तेषु बहुष्वमर्त्यैः अद्यापि रत्नाकर एव सिन्धुः॥

अत्र प्रथम श्लोकेन काव्यार्थचोरेभ्यः काव्यस्य संरक्षणं प्रार्थितम्। अनन्तरं कविसूक्तिवैचित्र्याणां अक्षयत्वं विचिन्त्य 'गृह्णन्तु सर्वे' इत्यादिना संरक्षणनिषेधः कृत इत्याक्षेपः।

द्वितीयः आक्षेपः

निषेधाभासमाक्षेपं बुधाः केचन मन्वते।
नाहं दूती, तनोस्तापः तस्याः कालानलोपमः॥ ७२॥

केचन बुधाः निषेधाभासं आभासरूपं निषेधं आक्षेपं मन्वते। तथा च निषेधाभासः आक्षेप इति द्वितीयाक्षेपलक्षणम्। नाहं दूती, तस्याः (नायिकायाः) तनोः तापः शरीरतापः कालानलोपमः प्रलयकालाग्नितुल्यः (नितरामसह्य इत्यर्थः) इत्युदाहरणम्। असह्यविरहवेदनातप्तया नायिकया प्रेषिताया दूत्याः नायकं प्रति वचनमिदम्। नाहं दूती इति निषेधोऽत्र बाधितः सन् तदाभासरूपो भूत्वा नाहमनुनयकालोचितकैतववादिनी, किन्तु सत्यमेव वदामीत्यर्थं पर्यवस्यन् इदानीमेव आगत्य नायिका रक्ष्यतामिति विशेषमाक्षिपन् आक्षेपालङ्कारः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Where a denial is only apparent and not real and consequently, some other meaning which is not expressed is conveyed, some scholars accept अपह्नवालङ्कार। 'I am not a go-between दूती, her bodily heat (affliction) is equal to the heat of the fire at the end of the world' is the example, Here the denial that the speaker is not a दूती is not true because she is really a दूती. So this apparent denial is intended to suggest that she is not speaking any falsehood as go-betweens generally do to bring about the union of lovers, but she is now speaking the truth and that the lover should go at once and save his sweetheart's life. Hence this is the second variety of आक्षेप। 72

द्वितीयाक्षेपस्य अपरमुदाहरणम्

नरेन्द्रमौले न वयं राजसन्देशहारिणः।
तवत्कुटुम्बिनस्तेऽद्य न शत्रुः कश्चिदीक्ष्यते॥

अत्र सन्देशवाहकानां उक्तौ 'न वयं सन्देशहारिणः' इति निषेधो बाधितः सन् तदाभासरूपो भूत्वा सन्धिसम्भाषणकालोचितकैतवत्वचनपरिहारेण यथार्थवादित्वे पर्यवस्यन् सर्वेऽपि राजानः (शत्रवोऽपि) स्वकुटुम्बवत् संरक्षणीयाः इति विशेषमाक्षिपति।

तृतीयः आक्षेपः

आक्षेपोऽन्यो विधौ व्यक्ते निषधे च तिरोहिते।
गच्छ गच्छसि चेत्कान्त! तत्रैव स्याज्जनिर्मम॥७३॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विधौ व्यक्ते स्फुटे सति निषेधे तिरोहिते अस्फुटे च सति अन्यः तृतीयः आक्षेपः भवति। यत्र अनभिमतं विधिं स्फुटं प्रकटीकृत्य अभिमतो निषेध भङ्ग्यन्तरेणास्फुटतया प्रकाश्यते तत्राक्षेप इति निष्कर्षः। हे कान्त! गच्छसि चेत् गच्छ, अवश्यं गन्तव्यं चेत् गम्यताम्। त्वं यत्र गच्छसि तत्रैव मम जनिः जन्म स्यात् इत्युदाहरणम्। अत्र कान्तस्य दूरदेशगमनस्य अनभिमतस्यापि गच्छेति गमनानुज्ञा स्फुटं प्रकटिता। ततश्च मे तत्रैव पुनर्जन्म भवतु इति भङ्ग्यन्तरेण विरहे स्वस्य मरणमेव भविष्यतीति सूचनात् अभिमतो गमननिषेधः गूढतया प्रकाश्यत इति लक्षणसमन्वयः।

Where sanction of a thing is plainly expressed while the intended objection is concealed and hinted in a beautiful way, it is the third variety of आक्षेप। 'Dear! if you have decided to go, you may do so. Let my birth (rebirth) be in that place where you go'. Here the speaker clearly expresses her consent for the departure of her lover but her real intention is to prevent him from going. That is concealed in her speech praying for her birth in the place where he goes which, in turn, hints to her death if he goes and thus conveys her objection to his departure. 73

तृतीयाक्षेपस्यापरमुदाहरणम्

न चिरं मम तापाय तव यात्रा भविष्यति।
यदि यास्यसि यातव्यमलमाशङ्क्यापि ते॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र गमने स्वमरणसूचनेन गमननिषेधः गर्भीकृतः।

३३. विरोधाभासालङ्कारः

आभासत्वे विरोधस्य विरोधाभास इष्यते।
विनापि तन्वि हारेण वक्षोजौ तव हारिणौ ॥ ७४ ॥

विरोधस्य आभासत्वे आपाततः स्फुरणे, पर्यवसाने तत्परिहारे च सति विरोधाभासो नाम अलङ्कारः इष्यते। हे तन्वि! तव वक्षोजौ स्तनौ हारेण विनापि हारिणौ हारवन्तौ मनोहारिणौ च इत्यत्र हारेण विनापि हारिणाविति विरोधः स्फुरति, ततश्च हारिणावित्यस्य मनोहारिणावित्यर्थयोजनया विरोधपरिहाराद् विरोधाभासः।

Where at first sight there appears to be a contradiction or inconsistency in the idea expressed and it is set right by reading the sense intended by the poet, the figure of speech is विरोधाभासः। 'O young lady, your breasts are possessed of a garland (attractive) even without a garland' is the example. Here the apparent contradiction of possessing a garland without it is set right by reading the sense 'attractive' for the word हारिणौ.

विरोधाभासस्य अपरमुदाहरणम्

प्रतीपभूरेव किं तता भिया विरुद्धधर्मैरपि मे नृतोऽञ्जता।
अमित्रजिन्मित्रजिदोजसा स यद्विवारदक् चारदगप्यवर्तत ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र नलः अमित्रजिदपि ओजसा मित्रजित्, विचारदृगपि चारदृक् इति आपाततः विरोधे प्रतीयमानेऽपि अमित्राणां शत्रूणां जेतापि ओजसा मित्रस्य सूर्यस्य जेता, तथा विचारे दत्तदृष्टिः चारदृष्टिश्चेति विरोधपरिहारात् विरोधाभासः।

३४. विभावनालङ्कारः-प्रथमा विभावना

विभावना विनापि स्यात् कारणं कार्यजन्म चेत्।
अप्यलाक्षारसासिक्तं रक्तं त्वच्चरणद्वयम्॥ ७५॥

कारणं विनापि प्रसिद्धकारणाभावेऽपि कार्योत्पत्तिवर्णने विभावनालङ्कारः। विभाव्यते कारणान्तरं यस्यामिति विभावना। हे कान्ते तव चरणद्वयं अलाक्षारसासिक्तमपि लाक्षारसलेपनं विनापि रक्तं लोहितं जातं इत्यत्र चरणयोः लौहित्यस्य प्रसिद्धलाक्षारसलेपनरूपकारणाभावेऽपि उत्पत्तिवर्णनात् विभावनालङ्कारः। लौहित्यस्य स्वाभाविकत्वाद्विरोधपरिहारः।

Where the effect is described to have been produced without the well-known cause, the figure is विभावना। There is a contradiction here which has to be explained by the inference of some other cause—विभाव्यते कारणान्तरं यस्यामिति विभावना। 'The pair of your feet is red even though it is not painted with red lac is the example. Here the feet are said to be red even without the well-known cause of redness—painting with red lac. The

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

apparent contradiction has to be explained away by the natural redness of the feet. 75

विभावना षड्विधा—(1) कारणं विना कार्योत्पत्तिः। (2) हेतुवैकल्येऽपि कार्योत्पत्तिः, (3) प्रतिबन्धकसत्त्वेऽपि कार्योत्पत्तिः (4) अकारणात् कार्योत्पत्तिः, (5) विरुद्धकार्योत्पत्तिः, (6) कार्यात् कारणोत्पत्तिः इति।

प्रथमविभावनाया अपरमुदाहरणम्

अपीतक्षीवकादम्बं अनिमृष्टामलम्बरम्।
अप्रसादितसूक्ष्मं तु जगदासीन्मनोहरम्॥

अत्र पानमार्जनपादरूपप्रसिद्धकारणाभावेऽपि क्षीवत्वामलत्वसूक्ष्मत्वरूपकार्योत्पत्तिवर्णनाद् विभावना। शरत्समयहेतुकत्वेन विरोधपरिहारः।

द्वितीया विभावना

हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता।
अस्त्रैरतीक्ष्णकठिनैः जगज्जयति मन्मथः॥ ७६॥

हेतूनां असमग्रत्वे अपूर्णत्वेऽपि कार्योत्पत्तिवर्णने द्वितीयाविभावना। अतीक्ष्णैः अकठिनैश्चास्त्रैः मन्मथः जगज्जयति इत्यत्र हेतूनामस्त्राणां तीक्ष्णत्वादिगुणवैकल्येऽपि जगज्जयरूपकार्योत्पत्तिवर्णनाद् विभावना।

Where the effect is produced when the cause is deficient in certain aspects, it is another (second) variety

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

of Vibhāvanā, 'Cupid conquers the world with arrows which are neither sharp nor hard' is the example. Here the arrows are said to be deficient in sharpness and hardness, yet the effect—conquest of the world—is produced. 76

अस्या एवापरमुदाहरणम्

उद्यानमारुतोद्धूताः चूतचम्पककेरणवः।
उदस्रयन्ति पान्थानामस्पृशन्तो विलोचने॥

अत्र स्पर्शनक्रियावैकल्येऽपि रेणुभिः अश्रूद्गमनरूपकार्य-जननाद् विभावना।

तृतीया विभावना

कार्योत्पत्तिस्तृतीया स्यात् सत्यपि प्रतिबन्धके।
नरेन्द्रानेव ते राजन् दशत्यसिभुजङ्गमः॥ ७७॥

प्रतिबन्धे सत्यपि यदि कार्योत्पत्तिर्वर्ण्यते सा तृतीया विभावना। हे राजन् तव असिरेव खड्ग एव भुजङ्गमः सर्पः नरेन्द्रानेव विषवैद्यानेव (नृपतीनेव) दशति इत्यत्र सर्पदंशप्रतिबन्धकमन्त्रौष-धादिसत्वेऽपि दशतीति कार्योत्पत्तिवर्णनात् तृतीया विभावना। नरेन्द्र शब्दस्य श्लेषेण नृपत्यर्थकत्वे विरोधपरिहारः।

Where the effect comes into being even in the presence of obstacles, the figure is the third variety of Vibhavana. 'O king, the snake of your sword bites only

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

the Narendras is the example. The word नरेन्द्रः means the curers' of poison and kings. In the first sense, there is the effect, biting, in spite of the presence of obstacles such as medicines and charms which the curers of sanke-bite possess, but the apparent contradiction is explained away by the other meaning 77

अस्या अपरमुदाहरणम्

चित्रं तपति राजेन्द्र प्रतापतपनस्तव ।
अतातत्रमुत्सृज्य सातत्रं द्विषद्गणम् ॥

अत्र तापप्रतिबन्धकातपत्रसत्वेऽपि प्रतापतपनः द्विषद्गणं तपतीति कार्योत्पत्तिवर्णनाद् विभावनालङ्कारः ।

चतुर्थी विभावना

अकारणात्कार्यजन्म चतुर्थी स्याद्विभावना ।
शङ्खाद्वीणानिनादोऽयं उदेति महदद्भुतम् ॥ ७८ ॥

अकारणात् कारणभिन्नात् कार्यजन्म चतुर्थी विभावना । शङ्खाद् वीणानिनादः उदेति इत्यत्र वीणाध्वनेः कारणं वीणा, तद्भिन्नात् शङ्खाद् वीणानिनादोत्पत्तिवर्णनाद् विभावना । शङ्खकामिनी कण्ठयोः, वीणानिनादमधुरगीतयोश्च अभेदाध्यवसानात् विरोधपरिहारः ।

Where the result is produced from a cause different from the normal one, it is the fourth variety of Vibhavana. 'It is really a wonder that the sound of Veena arises from a conch' is the example. The cause of the sound of

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Veena is, Veena itself and not the conch. Since वीणनाद is said to arise from शंख this is विभावना। Here the conch and the lady's neck are identified as one and consequently sweet music and the sound (tune) of Veena are identified. 78

अस्याः अपरमुदाहरणम्

तिलपुष्पात्समायाति वायुश्चन्दनशीतलः।
इन्दीवरयुगाच्चित्रं निःसरन्ति शिखीमुखाः॥

अत्र चन्दनशीतलस्य वायोः तिलपुष्पात् कारणभिन्नादुत्पत्ति-र्विभावना। तिलकुसुमनायिकानासिकयोः, वातनिश्वासयोश्चाभेदाध्यव-सानाद् विरोधपरिहारः।

पञ्चमी विभावना

विरुद्धात्कार्यसम्पत्तिर्दृष्टा काचिद्विभावना।
शीतांशुकिरणास्तन्वीं हन्त संतापयन्ति ताम्॥ ७९॥

विरुद्धात् विरुद्धकारणात् कार्यसम्पत्तिः कार्योत्पत्तिः पञ्चमी विभावना। शीतांशोः किरणाः तन्वीं सन्तापयन्तीत्यत्र शीतलत्वात् तापनिवर्तकाः चन्द्रकिरणाः तन्व्याः तापं जनयन्तीति विरुद्धकारणा-त्कार्योत्पत्तिरूपा पञ्चमी विभावना। तन्व्याः विरहिणीत्वाद् विरोधपरिहारः।

Where the effect comes into being ffom the opposite cause, it is the fifth variety of विभावना। Alas! the rays

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

of the moon cause heat in the young lady' is the example. Here the cool rays of the moon which are the cause of removing heat are said to cause it. The apparent contradiction is explained away by the fact that the lady is separated from her lover. 79

अस्याः अपरमुदाहरणम्

उदिते कुमारसूर्ये कुवलयमुल्लसति भाति न क्षत्रम् ।
मुकुलीभवन्ति चित्रं पररा जकुमारपाणिपद्मानि ॥

अत्र सूर्ये उदिते सति कुवलयमुल्लसति, नक्षत्रं प्रकाशते, पद्मानि मुकुलीभवन्ति इति विरुद्धात् कारणात् कार्योत्पत्तिर्वर्णिता। कुमार एव सूर्यः, तस्मिन् उदिते भूमण्डलं उल्लसति, क्षत्रं न भाति, शत्रुराज-कुमाराणां पाणय एव पद्मानि मुकुलीभवन्तीति योजनया विरोधपरिहारः ।

षष्ठी विभावना

कार्यात्कारणजन्मापि दृष्टा काचिद्विभावना ।
यशः पयोराशिरभूत् करकल्पतरोस्तव ॥ ८० ॥

कारणात्कार्योत्पत्तिरिति नियममुल्लङ्घ्य कार्यात्कारणोत्पत्तिवर्णने षष्ठी विभावना। तव कर एव कल्पतरुः तस्माद् यश एव पयोराशिः अभूदित्यत्र क्षीरसमुद्रात् कल्पतरोरुत्पत्तिरिति प्रसिद्धं कार्यकारण-भावमुल्लङ्घ्य कल्पतरोः पयोराशेरुत्पत्तिवर्णनाद् विभावना। राज्ञो वितरणशीलस्य कराद् यशसः उत्पत्तिरिति विरोधपरिहारः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Where the cause is said to have been produced by the effect, it is the sixth variety of विभावना। 'The ocean of fame was born of the heavenly tree 'Kalpaka' of your hand' is the example. It is well known that Kalpaka tree was born of the ocean but here it is said that the ocean was born of the Kalpaka tree and hence विभावना। The hand of the generous king is identified as Kalpaka tree and his fame is identified with the ocean. So the apparent contradiction is explained away by the fact that fame is born of his hand. 80

अस्याः अपरमुदाहरणम्

जाता लता हि शैले जातु लतायां न जायते शैलः।
संप्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातम्॥

अत्र कनकलतायां गिरिद्वयं जातमिति कार्यात् कारणोत्पत्तिः वर्णिता। कनकलताशब्देन कामिनीदेहस्य, गिरिद्वयशब्देन स्तनद्वयस्य च विवक्षया विरोधपरिहारः।

३५० विशेषोक्त्यलङ्कारः

कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे।
हृदि स्नेहक्षयो नाभूत् स्मरदीपे ज्वलत्यपि॥ ८१॥

पुष्कलकारणे संपूर्णकारणे सति कार्याजनिः कार्यानुत्पत्तिः विशेषोक्तिर्नाम अलङ्कारः। स्मरदीपे ज्वलति सत्यपि हृदि स्नेहक्षयः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तैलक्षयः (प्रेमक्षयश्च) नाभूत् इत्यत्र दीपज्वलने तैलक्षयकारणे सत्यपि तदक्षयवर्णनाद् विशेषोक्तिः। स्मरे दीप्यमाने प्रेमक्षयो नाभूदिति विवक्षया विरोधपरिहारः। कारणाभावे कार्योत्पत्तिर्विभावना; कारणसत्वे कार्यानुत्पत्तिः विशेषोक्तिरिति अनयोर्भेदः।

Where the effect is not produced in spite of the presence of the full cause, the figure is विशेषोक्ति। This is just the opposite of विभावना। 'Even though the lamp of cupid was burning, the oil (love) did not decrease in the heart' is the example. Here the burning of the lamp is the cause of decrease in the oil, but that has not happened. So this is विशेषोक्तिः। The apparent contradiction is explained away by the intended sense that love did not decrease when cupid was tormenting the heart. 81

विशेषोक्तेरपरमुदाहरणम्

अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः।
अहो दैवगतिश्चित्रा तथापि न समागमः॥

अत्र समागमकारणसत्वेऽपि तदनुत्पत्तिवर्णनाद् विशेषोक्तिः। तत्र च निमित्तमुक्तं 'अहो दैवगतिश्चित्रा' इति।

३६. असंभवालङ्कारः

असंभवोऽर्थनिष्पत्तेः असंभाव्यत्ववर्णनम्।
को वेद गोपशिशुकः शैलमुत्पाटयेदिति॥ ८२॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अर्थनिष्पत्तेः कार्यसिद्धेः असंभाव्यत्वर्णनं असंभवालङ्कारः। गोपशिशुकः बालकः कृष्णः शैलं गोवर्धनपर्वतं उत्पाटयेदिति उन्मूलयेदिति को वेद, को वा जानाति स्म? इत्यत्र बालकेन शैलोत्पाटनस्य असंभाव्यत्ववर्णनात् असंभवालङ्कारः।

The description of the inconceivability of a thing that has actually come to pass is असंभवालङ्कारः। 'Who ever knew that the cowboy would lift the mountain?' is the example. The fact that a cowboy lifted (up-rooted) the Govardhana mountain is inconceivable and hence असंभवालङ्कारः। 82

असंभवस्य अपरमुदाहरणम्

अयं वारांनिधिरेको निलय इति रत्नाकर इति।
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापःस्यति मुनिः॥

अत्र वारांनिधिं समुद्रं मुनिः अगस्त्यः एवं पास्यतीति को जानीते? इति मुनिना समुद्रपानस्य असंभाव्यत्ववर्णनाद् असंभवालङ्कारः।

३७. असंगत्यलङ्कारः—प्रथमा असंगतिः

विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसङ्गतिः।
विषं जलधरैः पीतं मूर्च्छिताः पथिकाङ्गनाः॥ ८३॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ययोः कार्यहेत्वोः कार्यकारणयोः भिन्नदेशत्वं भिन्नदेशावस्थानं विरुद्धं अनुपपन्नं तयोः भिन्नदेशत्ववर्णने असंगतिरलङ्कारः। ययोः कार्यहेत्वोः भिन्नदेशत्वं न विरुद्धं तत्र नासंगतिरिति भावः। जलधरैः मेघैः विषं गरलं (जलं) पीतं, पथिकाङ्गनाः वियोगिवध्वः मूर्च्छिताः इत्यत्र विषपानं मेघे, तत्कार्यं च मूर्च्छा पथिकाङ्गनासु इति कार्यकारणयोः विरुद्धभिन्नदेशत्ववर्णनादसङ्गतिलक्षणसमन्वयः। पीतजलानां मेघानां कामोद्दीपकत्वात् पथिकाङ्गना मूर्च्छिता इति विरोधपरिहारः।

असंगतिः त्रिविधा। (1) कार्यहेत्वोः विरुद्धभिन्नदेशत्वरूपा, (2) एकत्र कर्तव्यस्य अन्यत्र कृतिरूपा, (3) अन्यत् चिकीर्षोः तद्विरुद्धकृतिरूपा चेति। तत्रेदं प्रथमायाः असंगतेरुदाहरणम्।

When the cause and effect are described in two different places which is inconsistent with the usual experience, the figure is असंगतिः। 'The clouds drank the poison (water) and the wives of the travellers fainted.' Usually the person who drinks poison faints. But here the cause and effect—the drinking of poison and fainting—are described in two different places and hence असंगत्यलङ्कारः। The apparent inconsistency is explained away by the fact that fresh clouds inflame passion in the hearts of lovers in separation. There are three kinds of असङ्गति of which this is the first variety.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अस्याः अपरमुदाहरणम्

अहो खलभुजङ्गस्य विचित्रोऽयं वधक्रमः।
अन्यस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते॥

अत्र खलभुजंगः एकस्य श्रोत्रं दशति, अन्यः प्राणैः वियुज्यते इति सर्पदंशमरणयोः कार्यकारणयोः भिन्नदेशत्ववर्णनादसङ्गतिः। खलः कस्यचित् कर्णे किमपि कथयति, तेन चान्यस्य कस्यचित् मरणं भवतीति विरोधपरिहारः।

द्वितीया असङ्गतिः

अन्यत्र करणीयस्य ततोऽन्यत्र कृतिश्च सा।
अपारिजातां वसुधां चिकीर्षन् द्यां तथाकरोः॥ ८४॥

अन्यत्र करणीयस्य वस्तुनः ततोऽन्यत्र अन्यस्मिन्नधिकरणे कृतिः द्वितीया असङ्गतिः। (हे कृष्ण) त्वं वसुधां भूमिं अपारिजातां अपगतशत्रुसमूहां कर्तुं इच्छन् द्यां स्वर्गं तथा अपारिजातां पारिजातरहितां अकरोः इत्यत्र अन्यत्र भूमौ करणीयस्य अपारिजातत्वस्य स्वर्गे करणवर्णनात् असङ्गतिलक्षणसमन्वयः। अपारिजातामित्यत्र श्लेषमूलकाभेदाध्यवसानेन यदसाङ्गत्यं भासते तस्य भूमिपक्षे स्वर्गपक्षे च पृथगर्थयोजनयापरिहारः।

Where a thing which has to be done in one place is described to have been done in another place, it is the second type of Asangati. Wishing to make the earth अपारिजाता (free from enemy hosts) you have made the

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

heaven अपारिजाता (having no पारिजात tree)' is the example. Here अपारिजातत्वं intended to be done on earth is described to have been done in heaven. The apparent contradiction is explained away by the double meaning (श्लेष) in the word अपारिजाताम्। 84

अन्याः अपरमुदाहरणम्

त्वत्सङ्गखण्डितसपत्नबलासिनीनां
भूषा भवन्त्यभिनवा भुवनैकवीर।
नेत्रेषु कज्जलमयोरुषु पत्रवल्ली
चोलेन्द्रसिंह तिलकं करपल्लवेषु॥

अत्र चोलेन्द्रेण हताः ये शत्रवः तेषां वध्वः नेत्रेषु कज्जलं, ऊरुषु पत्रवल्लीं, करपल्लवेषु तिलकं च कुर्वन्तीति अन्यत्र भुजस्तन-ललाटेषु कर्तव्यानां भूषणानां अन्यत्र नेत्रादिषु करणवर्णनाद् असंगतिः। शिरसि हस्तं निधाय रुदतीनां ईदृशी समवस्था दृश्यते इति विरोधपरिहारः।

तृतीया असङ्गतिः

अन्यत् कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिश्च सा।
गोत्रोद्धारप्रवृत्तोपि गोत्रोद्वेदं पुराकरोः॥ ८५॥

अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिः प्रकृतकार्यविरुद्धकार्यकरणं तृतीया असङ्गतिः। (हे कृष्ण) त्वं पुरा वराहावतारे गोत्रोद्धारे भूम्याः उद्धरणे प्रवृत्तोऽपि गोत्रोद्वेदं गोत्राणां पर्वतानां उद्वेदं दलनं (खुर-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विघट्टनादिभिः) अकरोः इत्यत्र गोत्रोद्धारप्रवृत्तस्य तद्विरुद्धगोत्रोद्भेदकरण-वर्णनाद् असङ्गतिः। श्लेषेण विरोधपरिहारः।

Where a person intending to do one thing is described to have done the opposite thing, the figure of speech is the third variety of Asangati. 'O Krishna, though you formerly worked for गोत्रोद्धार (lifting or saving the earth) you actually did गोत्रोद्भेद (breaking the earth, mountains) is the example. Here the person working for गोत्रोद्धरण is described to have done the opposite thing—गोत्रोद्भेद and hence असङ्गति। The apparent contradiction is explained away by the double meaning (श्लेष) in the word गोत्र which means earth and mountains. 85

अस्या अपरमुदाहरणम्

मोहं जगत्त्रयभुवामपनेतुमेतद्
आदाय रूपमखिलेश्वर देहभाजाम्॥
निःसीमकान्तिरसनीरधिनामुनैव
मोहं प्रवर्धयसि मुग्धविलोचनीनाम्॥

अत्र मोहमपनेतुं स्वीकृतेन रूपेण ईश्वरः मुग्धविलोचनानां मोहं प्रवर्धयति इति अन्यत्कर्तुं प्रवृत्तेन तद्विरुद्धकृतिरूपा असंगतिः। जनानां अज्ञानं निवर्तयितुमादत्तेन रूपेण मुग्धविलोचनानां अनुरागं वर्धयतीति विरोधपरिहारः॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

३८. विषमालङ्कारः—प्रथमं विषमम्

विषमं वर्ण्यते यत्र घटनार्ननुरूपयोः ।
क्वेयं शिरीषमृद्वङ्गी, क्व तावन्मकरध्वजः ॥ ८६ ॥

अननुरूपयोः विसदृशयोः अर्थयोर्यत्र घटना संबन्धो वर्ण्यते तत्र विषमालङ्कारः । इयं शिरीषमृद्वङ्गी क्व, तादृक् तथाविधः मकरध्वजः क्व इत्यत्र अतिमृदुलत्वेन अतिदुस्सहत्वेन च असदृशयोः अङ्गना-मकरध्वजयोः घटनाद् विषमालङ्कारः । अयं च विषमालङ्कारः त्रिविधः (1) विरूपघटनारूपः (2) विरूपकार्योत्पत्तिरूपः (3) इष्टार्थोद्यमादनिष्टावाप्तिरूपश्चेति । तत्रेदमाद्यस्योदाहरणम् ।

Where a connection between two or more ill-suited things is described, it is विषमालङ्कारः । 'Where is this lady with limbs so soft as the śrīṣa flowers and where is such torment of love' is the example. Here a connection is described between the soft limbs of the lady and the unbearable torment of love which are ill-suited. The impropriety of the connection is conveyed by the use of the word क्व twice. There are three kinds of विषम of which this is the first variety. 86

प्रथमविषमस्य अपरमुदाहरणम्

अभिलषसि प्रदीप्तो वक्त्रलक्ष्मी मृगाक्ष्याः
पुनरपि सकलन्धौ मज्ज संक्षालयाङ्गम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सुविमलमथ बिम्बं पारिजातप्रसूनैः
क्षुरभय वद नोचेत् त्वं क तस्या मुखं क।

अत्रासदृशयोः चन्द्रमुखलक्ष्म्योर्घटनाद्विषमम्।

द्वितीयं विषमम्

विरूपकार्यस्योत्पत्तिरपरं विषमं मतम्।
कीर्तिं प्रसूते धवलां श्यामा तव कृपाणिका ॥ ८७ ॥

कारणगुणात् विरुद्धकार्यगुणोत्पत्तिवर्णने द्वितीयं विषमम्। श्यामवर्णायाः कृपाणिकायाः तद्विरुद्धधवलकीर्तेः उत्पत्तिवर्णनात् लक्षण-समन्वयः। कार्यस्य विलक्षणगुणशालित्वे विषमालङ्कारः। कारणस्य विरुद्धकार्यनिर्वर्तकत्वे पञ्चमी विभावना इत्यनयोर्भेदः।

Where the effect produced has a quality that is opposed to the quality of the cause, the figure is second Viṣama. 'Your black sword gives rise to the white fame' is the example. Here the quality of the effect धावल्यं is opposed to the quality of the cause श्यामत्वम्। In the fifth variety of विभावना the effect comes into being from an opposite cause while in this विषम the quality of the effect is opposed to that of the cause. 87

तृतीयं विषमम्

अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात्।
भक्ष्याशयाऽहिमञ्जूषां दष्ट्वाखुस्तेन भक्षितः ॥ ८८ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इष्टार्थसमुद्यमात् अभिलषितार्थायोगात् न केवलमिष्टस्य अप्राप्तिः अपि तु अनिष्टस्य अवाप्तिरपि, तत् तृतीयं विषमम्। आखुर्मूषिकः भक्ष्याशया भक्ष्यद्रव्यलाभतृष्णया अहिमञ्जूषां सर्पपेटिकां दष्ट्वा दशनैः छित्वा तेन सर्पेण भक्षित इत्यत्र आहारार्थं प्रवृत्तस्य मूषिकस्य न केवलं भक्ष्यानवाप्तिः अपि तु मरणरूपानिष्टावाप्तिरपीति तृतीयं विषमम्।

'Where an effort to obtain something desired ends in the non-attainment of the desired and the attainment of something quite unpleasant (undesired), the figure is the third variety of Visama. 'Biting to open the snake basket in the hope of getting some food the rat was eaten by the snake' is the example. Here the rat not only failed to get food but also met with undesired death and hence this is an example of Viṣamālaṅkāra. 88

तृतीयविषस्य अपरमुदाहरणम्

गोपाल इति कृष्ण त्वं प्रचुरक्षीरवाञ्छया।
श्रितो मातृस्तनक्षीरमप्यलभ्यं त्वया कृतम्॥

अत्र इष्टस्य प्रचुरक्षीरस्य अलाभः मातृस्तनक्षीरानवाप्तिरूपा अनिष्टावाप्तिश्चेति तृतीयं विषमम्। मातृक्षीरानवाप्तिः मुक्तिदानात्।

३९. समालङ्कारः—प्रथमं समम्

सभं स्याद्वर्णनं यत्र द्वयोरप्यनुरूपयोः।
स्वानुरूपं कृतं सद्म हारेण कुचमण्डलम्॥ ८९॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विषमालङ्कारप्रतिद्वन्द्वितया समालङ्कारोऽपि त्रिविधः—(1) अनुरूपवर्णनरूपः, (2) सरूपकार्योत्पत्तिरूपः, (3) विनानिष्टं इष्टावाप्तिरूपश्चेति। यत्र अनुरूपयोः द्वयोः (संबन्धः) वर्ण्यते तत्र प्रथमं समम्। हारेण कुचमण्डलं स्वस्यानुरूपं सद्म कृतमित्यत्र अनुरूपयोः हारकुचमण्डलयोः संबन्धवर्णनात्समालङ्कारः।

Where a connection between two or more befitting things is described, it is the first variety of Samālaṅkarā. 'The necklace made the circular region of the breasts its worthy habitation' is the example. Here a connection between two befitting things-the necklace and breasts-is described and hence Samālaṅkāra. Samam is quite the opposite of Visamam. It is also of three kinds of which this is the first. 89

प्रथमसमस्य अपरमुदाहरणम्

कौमुदीव तुहिनांशुमण्डलं जाह्नवीव शशिखण्डमण्डनम्।
पश्य कीर्तिरनुरूपमाश्रिता त्वां विभाति नरसिंहभूपते॥

अत्र कौमुदीचन्द्रमण्डल—जाह्नवीचन्द्रशेखर—कीर्तिनरपतीनां अनुरूपाणां घटनात् समालङ्कारः।

द्वितीयं समम्

सारूप्यमपि कार्यस्य कारणेन समं विदुः।
नीचप्रवणता लक्ष्मि जलजायास्तवोचिता॥ ९०॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कार्यस्य कारणेन सारूप्यं समानगुणवत्त्वं द्वितीयं समम् विदुः। हे लक्ष्मि जलात् जातायाः तव नीचप्रवणता निकृष्टानुसरणशीलत्वं उचिता इत्यत्र कारणभूतजलगुणस्य नीचप्रवणतायाः कार्ये लक्ष्म्यां वर्णनात्समालङ्कारः। नीचः निकृष्टदेशः, निकृष्टजनश्च।

Where the quality of the cause is described in the effect produced, it is the second variety of Samam. 'O! Lakshmi, it is only proper that you should resort to नीच, (low person, low place) being born of water' is the example. Here the quality of resorting to the low which is found in water, the cause, is described in the effect, Lakshmi. 90

द्वितीयसमस्य अपरमुदाहरणम्

दवदहनादुत्पन्नो धूमो घनतामवाप्य वर्षैस्तम्।
यच्छमयति तदुक्तं सोऽपि हि दवमेव निर्दहति॥

अत्र दवदहनादुत्पन्नो धूमः स्वजनकं दवदहनं शमयतीति यत् तदुक्तं यतः दवदहनोऽपि स्वजनकं दवं शमयतीति कार्यकारणयोः दावाग्निधूमयोः गुणसारूप्यवर्णनात् समालङ्कारः।

तृतीयं समम्

विनानिष्टं च तत् सिद्धिर्यदर्थं कर्तुरुद्यमः।
युक्तो वारणलाभोऽयं स्याल ते वारणार्थिनः॥ ९१॥

यदर्थं यत्कार्यसिद्ध्यर्थं कर्तुः उद्यमः तस्य कार्यस्य यदि अनिष्टं विना सिद्धिः, तत् तृतीयं समम्। हे स्याल, वारणार्थिनः गजार्थिनः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अयं वारणलाभः (राजपुरुषैः निवारणस्य लाभः) युक्तः इत्यत्र वारणस्य, श्लेषमूलकाभेदाध्यवसानेन इष्टस्य अनायासेन लाभवर्णनात् तृतीयं समम्। गजं याचितुं राजद्वारं गतः द्वारपालकैः दूरादेव निवारितः एवमन्येन सोपहासमुच्यते।

Where the desired thing is obtained easily without any undesirable happening, it is the third variety of Samam. 'Dear brother-in-law, it is quite proper that you got वारण (prevention) since you were seeking वारण (elephant)' is the example. Here वारण is sought and it is easily obtained and hence this is Samam. These words are addressed to one who went to the king with the idea of begging for an elephant but was stopped at the palace-gate by the gate-keeper.

तृतीयसमस्य अपरमुदाहरणम्

उच्चैर्गजैरटनमर्थयमान एव
त्वामाश्रयन्निह चिरादुषितोऽस्मि राजन्।
उच्चाटनं त्वमपि लम्भयसे तदेव
मामद्य नैव विफला महतां हि सेवा॥

अत्र हे राजन् उच्चं गजमारुह्य गमनमिच्छन्तं मां त्वं उच्चाटनं उच्चैर्गजैरटनं (दूरनिरसनं) लम्भयसे प्रापयसि इति अनायासेन इष्टसिद्धेः वर्णनात् समालङ्कारः। उच्चाटनशब्दे श्लेषेण दूरनिरसनरूपार्थान्तर-स्फुरणेन निन्दा गम्यते।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

४०. विचित्रालङ्कारः

विचित्रं तत्प्रयत्नश्चेद्विपरीतः फलेच्छया।
नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिम् ॥९२॥

फलेच्छया कस्यचित्फलस्य प्राप्त्यभिलाषेण विपरीतः प्रयत्नः यदि क्रियते तद् विचित्रम्। समुन्नतिं लब्धुं नमन्ति इत्यत्र समुन्नतिरूप-फलेच्छया तद्विपरीतं नमनं क्रियते इति विचित्रम्।

With a desire to obtain a particular result, where an opposite endeavour is made the figure is विचित्रम। 'Wise men bow down in order to reach a height far above the three worlds' is the example. Here the wise men do the opposite (bending) of what they wish to attain (height) and hence विचित्रम्।

विचित्रस्य अपरमुदाहरणम्

मलिनयितुं खलवदनं विमलयति जगन्ति देव कीर्तिस्ते।
मित्राह्लादं कर्तुं मित्राय द्रुह्यति प्रतापोऽपि॥

अत्र मलिनयितुं विमलयति, मित्राह्लादं कर्तुं मित्राय (सूर्याय) द्रुह्यति इति विपरीतप्रयत्नवर्णनाद्विचित्रम्।

४१. अधिकालङ्कारः - प्रथमं अधिकम्

अधिकं पृथुलाधारादाधेयाधिक्यवर्णनम्।
ब्रह्माण्डानि जले यत्र तत्र मान्ति न ते गुणाः ॥९३॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अतिपृथुत्वेन प्रसिद्धादाधाराद् आधेयस्य आधिक्यवर्णनं अधिकम्। ब्रह्माण्डानामप्याधारत्वेनातिविस्तीर्णे जले राज्ञो गुणाः न मान्ति इति आधेयभूतगुणानामाधिक्यवर्णनाद् अधिकम्।

Where the contents is mentioned to be larger than the container which is reputed to be large, the figure is Adhikam. 'Your virtues are not contained in the waters where many worlds have been contained' is the example. Here the virtues are said to be larger than the large container, the waters of deluge. 93

अस्यापरमुदाहरणम्

युगान्तकालप्रविसंहृतात्मनो
जगन्ति यस्यां सविकासमासत।
तनौ ममुस्तस्य न कैटभद्विषः
तपोधनाभ्यागमसंभवा मुदः॥

अत्र यस्य भगवतः शरीरे चतुर्दशभुवनानि प्रलयकाले सविकासं आसत तस्य शरीरे नारदागमनजनितमुदः न ममुरित्यधिकाधेयवर्णनाद् अधिकम्।

द्वितीयं अधिकम्

पृथ्व्याधेयाद्यदाधाराधिक्यं तदपि तन्मतम्।
कियद्वाग्ब्रह्म यत्रैते विश्राम्यन्ति गुणास्तव॥ ९४॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पृथुत्वेन प्रसिद्धादाधेयाद् आधारस्य आधिक्यवर्णनं द्वितीयं अधिकम्। (हे राम) तवानन्तकल्याणगुणाः यत्र विश्राम्यन्ति असंबाधं तिष्ठन्ति तद्वाग्ब्रह्म शब्दब्रह्म कियत्? किं परिमाणं स्यात्, तत्परिमाणमेतावदिति निर्णेतुं न शक्यत इत्यर्थः। अत्र आधेयगुणापेक्षया आधारस्य शब्दब्रह्मणः आधिक्यमुक्तम्।

Where the container is described to be larger than the large contents, it is the second variety of Adhika. How large is the all-pervading God of speech where your innumerable virtues rest' is the example. 94

अस्यापरमुदाहरणम्

अहो विशालं भूपाल भुवनत्रितयोदरम्।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते॥

४२. प्रत्यनीकालङ्कारः

प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः।
जैत्रनेत्रानुगौ कर्णौ उत्पलाभ्यामधः कृतौ॥ ९५॥

बलवतः प्रबलस्य (अत एव साक्षात्प्रतिकर्तुं अशक्यस्य) शत्रोः पक्षे पक्षान्तःपातिनि मित्रादिसहाये पराक्रमः प्रत्यनीकालङ्कारः। उत्पलाभ्यां इन्दीवराभ्यां जैत्रनेत्रानुगौ स्वजेतृनेत्रानुसारिणौ कर्णौ अधः कृतौ तिरस्कृतौ (अधः प्रदेशे कृतौ) इत्यत्र उत्पलाभ्यां साक्षात् नेत्रजये सामर्थ्याभावात् नेत्रानुसरणशीले श्रोत्रे अधःकृते इति शत्रोः पक्षतिर-

CC-0. Bhagavad Ramanuja National Research Institute. Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्कारवर्णनात् प्रत्यनीकम्। अधःकृतशब्दे श्लेषेण तिरस्काराधः प्रदेशकरणयोरभेदाध्यवसायः।

Where one, being too weak to attack a powerful enemy direct, shows valour at one belonging to his (enemy's) camp, the figure is प्रत्यनीकम्। 'The ears attached to the victorious eyes were subdued by the blue lotuses' is the example. Since the eyes extend up to the ears they are said to be the followers of the eyes. The blue lotuses are placed over the ears and hence the ears are said to have been अधःकृत which means subdued and placed below. 95

प्रत्यनीकस्यापरमुदाहरणम्

मम रूपकीर्तिमहरद्भुवि यस्तदनुप्रविष्टहृदयेयमिति।
त्वयि मत्सरादिव निरस्तदयः सुतरां क्षिणोति खलु तां मदनः॥

अत्र मदनः आत्मनो रूपख्यातिं हृतवतः सुन्दरपुरुषस्य प्रतीकाराशक्तः तदनुरक्तां तरुणीं निर्दयं क्षिणोतीति शत्रुरक्षतिरस्कारवर्णनात् प्रत्यनीकम्।

४३. काव्यार्थापत्यलङ्कारः

कौमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते।
स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम्॥९३॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पृथुत्वेन प्रसिद्धादाधेयाद् आधारस्य आधिक्यवर्णनं द्वितीयं अधिकम् । (हे राम) तवानन्तकल्याणगुणाः यत्र विश्राम्यन्ति असंबाधं तिष्ठन्ति तद्वाग्ब्रह्म शब्दब्रह्म कियत् ? किं परिमाणं स्यात्, तत्परिमाणमेतावदिति निर्णेतुं न शक्यत इत्यर्थः । अत्र आधेयगुणापेक्षया आधारस्य शब्दब्रह्मणः आधिक्यमुक्तम् ।

Where the container is described to be larger than the large contents, it is the second variety of Adhika. How large is the all-pervading God of speech where your innumerable virtues rest' is the example. 94

अस्यापरमुदाहरणम्

अहो विशालं भूपाल भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥

४२. प्रत्यनीकालङ्कारः

प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ।
जैत्रनेत्रानुगौ कर्णौ उत्पलाभ्यामधः कृतौ ॥ ९५ ॥

बलवतः प्रबलस्य (अत एव साक्षात्प्रतिकर्तुं अशक्यस्य) शत्रोः पक्षे पक्षान्तःपातिनि मित्रादिसहाये पराक्रमः प्रत्यनीकालङ्कारः । उत्पलाभ्यां इन्दीवराभ्यां जैत्रनेत्रानुगौ स्वजेतृनेत्रानुसारिणौ कर्णौ अधः कृतौ तिरस्कृतौ (अधः प्रदेशे कृतौ) इत्यत्र उत्पलाभ्यां साक्षात् नेत्राजये सामर्थ्याभावात् नेत्रानुसरणशीले श्रोत्रे अधःकृते इति शत्रोः पक्षतिर-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्कारवर्णनात् प्रत्यनीकम्। अधःकृतशब्दे श्लेषेण तिरस्काराधः प्रदेशकरणयोरभेदाध्यवसायः।

Where one, being too weak to attack a powerful enemy direct, shows valour at one belonging to his (enemy's) camp, the figure is प्रत्यनीकम्। 'The ears attached to the victorious eyes were subdued by the blue lotuses' is the example. Since the eyes extend up to the ears they are said to be the followers of the eyes. The blue lotuses are placed over the ears and hence the ears are said to have been अधःकृत which means subdued and placed below. 95

प्रत्यनीकस्यापरमुदाहरणम्

मम रूपकीर्तिमहरद्भुवि यस्तदनुप्रविष्टहृदयेयमिति।
त्वयि मत्सरादिव निरस्तदयः सुतरां क्षिणोति खलु तां मदनः॥

अत्र मदनः आत्मनो रूपख्यातिं हृतवतः सुन्दरपुरुषस्य प्रतीकाराशक्तः तदनुरक्तां तरुणीं निर्दयं क्षिणोतीति शत्रुरक्षतिरस्कारवर्णनात् प्रत्यनीकम्।

४३. काव्यार्थापत्यलङ्कारः

कौमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते।
स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम्॥९३॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कैमुत्येन कैमुतिकन्यायेन अर्थसंसिद्धिः विवक्षितार्थसिद्धिः काव्यार्थापत्तिः। यत्र दण्डापूपिकन्यायेनार्थसिद्धिर्वर्ण्यते तत्र काव्यार्थापत्तिरिति निष्कर्षः। [शास्त्रेऽप्यर्थापत्तेः सत्वात् तद्वारणाय काव्यपदमिति केचित्। वस्तुतस्तु अर्थापत्तिप्रमाणात् विलक्षणैव काव्यार्थापत्तिः।] सः सुन्दरत्वेन आह्लादकारित्वेन च प्रसिद्धः, अथवा पद्मजेता इन्दुः तव मुखेन जितः, (एवं सति) सरसीरुहां पद्मानां का वार्ता का कथा इत्युदाहरणम्। अत्र येन पद्मजेता इन्दुः जितः तेन पद्मानि जितानीति किं वक्तव्यं इति दण्डापूपिकन्यायेन पद्मजयरूपार्थस्य संसिद्धेः अर्थापत्तिः।

Where the desired idea is obtained by the application of कैमुतिकन्याय, the figure of speech is काव्यार्थापत्ति। When a difficult thing is said to have been done, it goes without saying that minor things would have been done and this is called कैमुतिकन्याय or दण्डापूपिकन्याय। When a rat is said to have gone away with the stick to which the packet of cakes was attached, it goes without saying that the cakes too are lost. 'That very moon has been vanquished by your face; where is the question of lotuses?' is the example. Here the moon at whose rise the lotuses fade away and therefore who is the conquerer of lotuses is said to have been vanquised by the lady's face. So the victory over the lotuses follows without specific mention. 96

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

काव्यार्थापत्तेरपरमुदाहरणम्

अधरोऽयमधीराक्ष्या बन्धुजीवप्रभाहरः।
अन्यजीवप्रभां हन्त हरतीति किमद्भुतम्॥

बन्धुजीवो बन्धूकपुष्पं तत्प्रभाहरः, बन्धूनां जीवानां प्रभाहरश्च इति श्लेषमूलाभेदाध्यवसानेन बन्धुजीवप्रभाहरस्य अन्यजीवप्रभाहरत्वं अनुक्तसिद्धमित्यर्थापत्तिः।

४४. काव्यलिङ्गालङ्कारः

समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्।
जितोऽसि मन्द कन्दर्प मच्चित्तेऽस्ति त्रिलोचनः॥९७॥

समर्थनीयस्य समर्थनापेक्षस्य अर्थस्य समर्थनं काव्यलिङ्गं नाम अलङ्कारः। हे मन्द मूढ कन्दर्प त्वं जितोऽसि, मम चित्ते त्रिलोचनः अस्ति इत्युदाहरणम्। अत्र मदनजयस्य दुष्करत्वात् तज्जयोपन्यासः समर्थनमपेक्षते। स्वान्तःकरणे मदनदाहकत्रिलोचनसन्निधानाप्रदर्शनेन तत्समर्थनं कृतमिति काव्यलिङ्गम्। समर्थको हेतुः वाक्यार्थः पदार्थो वा भवति। 'मच्चित्तेऽस्ति त्रिलोचनः' इत्यत्र वाक्यार्थो हेतुः।

Where an expressed idea which is in need of justification is substantiated by another idea, it is काव्यलिङ्गालङ्कारः। 'Fool cupid, you are vanquished; there is the three-eyed lord in my mind' is the example. Here the conquest of upid is an improbable idea which needs justification and

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

it is established by the reason that Siva is present in the mind. Siva is the destroyer of cupid. The reason establishing the idea may be expressed in a sentence or by a word. Here it is a sentence-मच्चित्तेऽस्ति त्रिलोचनः। 97

काव्यलिङ्गस्य अपरमुदाहरणम्

भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभे
हा सोमाम्परमरे गिरिसुताकान्तालयालङ्कृते।
अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखा-
लोकोच्छेदिनि मोक्षनामनि महामोहे निलीयामहे॥

अत्र मोक्षस्य महामोहत्वमप्रसिद्धं समर्थनमपेक्षते। तच्च युष्मत्सपर्यासुखालोकोच्छेदिनि इति पदार्थेन समर्थितमिति पदार्थहेतुकं काव्यलिङ्गम्॥

४५. अर्थान्तरन्यासालङ्कारः

उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः।

सामान्यविशेषयोः उक्तिः अर्थान्तरन्यासः। तयोश्च एकं प्रस्तुतं अपरमप्रस्तुतम्। ततश्च विशेषे प्रस्तुते तेन सह अप्रस्तुत-सामान्यस्य न्यासः एकः अर्थान्तरन्यासः। सामान्ये प्रस्तुते तेन सह विशेषस्य न्यासः द्वितीयः। एवमर्थान्तरन्यासो द्विविधः।

Where a general and a particular (special) statement are expressed, the figure of speech is अर्थान्तरन्यासः। When

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

a particular idea is relevant it is substantiated by a general statement and when a general idea is relevant, it is substantiated by a particular statement. Thus there are two kinds of अर्थान्तरन्यास।

अत्रेदमवधेयम्। सामान्यविशेषयोः न्यासे समर्थ्यसमर्थकभावः अवश्यं भवति। काव्यलिङ्गेऽपि समर्थ्यसमर्थकभावः अस्ति। एवं सति काव्यलिङ्गार्थान्तरन्यासयोरयं भेदः। समर्थ्यसमर्थकयोः सामान्य-विशेषसंबन्धे अर्थान्तरन्यासः, तदन्यनिष्पाद्यनिष्पादकभावादिसंबन्धे काव्यलिङ्गम् इति।

The difference between काव्यलिङ्ग and अर्थान्तरन्यास mus be noted. Where the relationship between the two ideas is समर्थ्यसमर्थकभाव it is अर्थान्तरन्यासः। If it is any other relationship, such as निष्पाद्यनिष्पादकभाव etc. it is काव्यलिङ्गम्।

(1) सामान्येन विशेषसमर्थनरूपस्य अर्थान्तरन्यासस्य उदाहरणम्.

हनूमानब्धिमतरद् दुष्करं किं महात्मनाम् ॥ ९८ ॥

अत्र हनूमान्, अब्धिं समुद्रं अतरत् इति विशेषः महात्मनां दुष्करं किं ? इति सामान्येन समर्थ्यते।

'Hanuman crossed the ocean; What is impossible for great men'? Here the particular idea that Hanuman crossed the ocean is substantiated by the general idea—what is impossible for great men?

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अस्यापरमुदाहरणम्

दिवाकराद्रक्षति यो गुहासु लीनं दिवा भीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव ॥

(2) विशेषेण सामान्यसमर्थनरूपस्य अर्थान्तरन्यासस्य

उदाहरणम्

गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम् ।
पुष्पमालानुषङ्गेण सूत्र शिरसि धार्यते ॥ ९९ ॥

स्वल्पोऽपि निकृष्टोऽपि गुणवद्वस्तुसंबन्धात् गौरवं याति प्राप्नोति । पुष्पमालाया: अनुषङ्गेण संपर्केण सूत्रं तन्तु: शिरसि धार्यते इत्यत्र निर्गुणस्य गुणवत्संपर्काद् गौरवप्राप्तिरूपं सामान्यं प्रस्तुतं, तन्तोः पुष्पमालासंबन्धेन शिरसा वहनरूपगौरवप्राप्तिरूपेण अप्रस्तुतविशेषेण समर्थितमिति अर्थान्तरन्यासलक्षणसमन्वय: ।

• By the association of an object possessing merits, even a small (insignificant) thing attains a higher status; By the association of a garland of flowers, a thread is carried on the head. Here a general statement is given in the first half of the verse and it is substantiated by the particular statement in the second half, and hence अर्थान्तरन्यास: ।

अस्यापरमुदाहरणम्

निजदोषावृतमन्तस्सामतिसुन्दरमिवाभाति विपरीतम् ।
पश्यति पित्तोपहत: शशिशुभ्रं शंखमपि पीतम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

४६. विकस्वरालङ्कारः

यस्मिन्विशेषसामान्यविशेषाः स विकस्वरः ।
स न जिग्ये महान्तो हि दुर्धर्षाः सागरा इव ॥ १०० ॥

यस्मिन् काव्ये विशेषसामान्यविशेषाः विन्यस्यन्ते तत्र विकस्वरालङ्कारः । यत्र कस्यचिद्विशेषस्य समर्थनार्थं सामान्यं विन्यस्य तत्प्रसिद्धावपि अपरितुष्यता कविना पुनर्विशेषान्तरं उपमानरीत्या अर्थान्तरन्यासविधया वा विन्यस्यते तत्र विकस्वरालङ्कार इति निष्कर्षः । सः प्रसिद्धो राजा न जिग्ये केनापि न जितः इति विशेषविन्यासः । तत्समर्थनं 'महान्तः दुर्धर्षा हि' इति सामान्येन क्रियते । ततश्च उपमानरीत्या सागरा इव इति विशेषन्यासः सामान्यमर्थं महतां दुर्जयत्वं दृढयतीति विकस्वरालङ्कारः ।

Where a special statement is substantiated by a general statement and that is again substantiated by a special statement (by way of analogy or समर्थ्यसमर्थकभाव), it is विकस्वरालङ्कारः । 'He was never vanquished; for, great men are invincible like the oceans' is the example. Here the particular statement that he was never vanquished is substantiated by the general statement that great men are invincible and that, in turn, is supported by the analogy of the oceans. 100

विकस्वरस्यापरमुदाहरणम्

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्रापि उपमानरीत्या विशेषान्तरस्य न्यासः। अर्थान्तरन्यास-विधया विशेषान्तरन्यासोदाहरणं तु अनुबन्धे द्रष्टव्यम्।

४७. वक्रोक्त्यलङ्कारः

वक्रोक्तिः श्लेषकाकुभ्यां अपरार्थप्रकल्पनम्।
मुञ्च मानं दिनं प्राप्तं नेह नन्दी हरान्तिके॥ १०१॥

श्लेषेण काकुना वा अपरार्थकल्पनं विवक्षितादन्यार्थे वाक्यतात्पर्यकल्पनं वक्रोक्तिः। हे प्रिये मानं कोपं मुञ्च, दिनं अहः प्राप्तमिति नायकेनोक्ते श्लेषेण नायकवाक्यस्यार्थान्तरं कल्पयित्वा समाधत्ते—इह सन्निकटे नन्दी नास्ति, किन्तु हरान्तिके शिवसन्निधौ वर्तते इति। अत्र नायकवाक्यस्य श्लेषेण निन्दितं प्राप्तं मा मुञ्च इति अर्थान्तरं कल्पितमिति वक्रोक्तिः।

Where a different meaning is attributed to an expressed statement through श्लेष or काकु the figure of speech is वक्रोक्ति। 'Cast off your anger, the day has dawned', 'There is no Nandin here, he is by the side of Siva' is the example. Here a different meaning is attributed to the statement 'मुञ्च मानं दिनं प्राप्तं' through श्लेष and it is construed as निन्दितं प्राप्तं मा मुञ्च—'Don't leave Nandin who has arrived' and hence the reply that there is no Nandin here. Thus this is an example of वक्रोक्ति through श्लेष

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वक्रोक्तेरपरमुदाहरणम्

अस्मालोच्य कोपस्ते नोचितेयमितीरिता।
नैवोचितेयमिति तं ताडयामास मालया॥

अत्र नैवोचितेयमिति काकुस्वरभेदेन उचितमेवेत्यर्थान्तरं प्रकल्प्य नायिका नायकं मालया ताडयामासेति वक्रोक्तिः।

Here we have वक्रोक्ति through काकु. By a change in the tone and intonation, the statement 'नोचितेऽयम्' is construed to mean 'उचितेयं'—'It is quite proper' and thus a different meaning is attributed.

४८. स्वभावोक्त्यलङ्कारः

स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम्।
कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते॥ १०२॥

जात्यादिस्थस्य जातिक्रियागुणादिसंबन्धिनः स्वभावस्य वर्णनं स्वभावोक्तिरलङ्कारः। उत्तरङ्गाक्षैः चञ्चललोचनैः स्तब्धकर्णैः निश्चलकर्णैः कुरङ्गैः हरिणैः उदीक्ष्यते इत्यत्र कुरङ्गस्वभाववर्णनात्स्वभावोक्तिः।

The description of anything according to its inherent nature is स्वभावोक्तिः। 'The deer gazes with unsteady eyes holding the ears erect' is the example. Here the characteristics natural to the species of deer are described and hence स्वभावोक्तिः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

४९. भाविकालङ्कारः

भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनम् ।
अहं विलोकयेऽद्यापि युध्यन्तेऽत्र सुरासुराः ॥ १०३ ॥

भूतस्य भाविनो वा अर्थस्य यः साक्षात्कारः तस्य वर्णनं भाविकम् । यत्र अतीतानागते प्रत्यक्षत्वेन वर्ण्येते तत्र भाविकमिति निष्कर्षः । देवासुराः अत्र प्रदेशे युध्यन्ति इति अहं अद्यापि विलोकये इत्यत्र अतीतस्य देवदानवयुद्धस्य प्रत्यक्षत्वेन वर्णनात् भाविकालङ्कारः।

५० उदात्तालङ्कारः

उदात्तमृद्धिश्चरितं श्लाघ्यं चान्योपलक्षणम् ।
सानौ यस्यांभवद्युद्धं तद्धूर्जटिकिरीटिनोः ॥ १०४ ॥

ऋद्धिः संपत्समृद्धिः, अन्योपलक्षणं श्लाघ्यं चरितं च उदात्तम् यत्र सम्पत्समृद्धिः वर्ण्यते तत्र उदात्तालङ्कारः । यत्र अन्याङ्गं श्लाघ्यं चरितं वर्ण्यते तत्रापि उदात्तालङ्कार इत्यर्थः । उपलक्षणशब्देनात्र अङ्गत्वमेव विवक्ष्यते । यस्य हिमालयस्य सानौ धूर्जटिकिरीटिनोः शिवार्जुनयोः तत्प्रसिद्धं युद्धमभवत् सोऽयं हिमवानिति शेषः । अत्र श्लाघ्यं चरितं शिवार्जुनयोर्युद्धं अन्याङ्गत्वेन हिमवन्माहात्म्याङ्गत्वेन वर्णितमित्युदात्तम् ॥

ऋद्धिवर्णनरूपोदात्तोदाहरणं तु—

रत्नभित्तिषु संक्रान्तैः प्रतिबिम्बशतैर्वृतः ।
ज्ञातो लङ्केश्वरः कृच्छ्रादाननेयैव तत्त्वतः ॥

अत्र रावणस्य संपत्समृद्धिः वर्ण्यते इत्युदात्तालङ्कारः ।

शुभमस्तु

—:o:—

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अनुबन्धः

(1) व्यतिरेकालङ्कारः [पृष्ठं - ८४]

उपमेयन्यूनत्वपर्यवसायिनो व्यतिरेकस्योदाहरणम्

रक्तस्त्वं नवपल्लवैरहमपि श्लक्ष्णैः प्रियाया गुणैः
त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्तास्तथा मामपि ।
कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः
सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः ॥

उपमेयस्य सशोकत्वात् न्यूनत्वम् ।

अनुभयपर्यवसायिनः उदाहरणम्

दृढतरनिबद्धमुष्टेः कोशनिषण्णस्य सहजमलिनस्य ।
कृपणस्य कृपाणस्य च केवलमाकारतो भेदः ॥

अत्र कृपणकृपाणयोर्न्यूनत्वमधिकत्वं वा नोक्तम्

(2) समासोक्तिः [पृष्ठं - ८९]

सारूप्यादप्रस्तुतप्रतीतावपि समासोक्तिः दृश्यते— यथा—

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम् ।
बहोः दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं दृढयति ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र वनवर्णने प्रस्तुते तत्सारूप्यात् कुटुम्बिषु धनसन्तानादि-समृद्ध्यसमृद्धिविपर्यासं प्राप्तस्य तत्समाश्रयस्य ग्रामनगरादेः वृत्तान्तः प्रतीयते। अत्र समृद्ध्यसमृद्धिविपर्यासवदाश्रयत्वं सादृश्यम्।

(3) अप्रस्तुतप्रशंसा [पृष्ठम् - ९७]

सामान्याद्विशेषावगतेरप्रस्तुतप्रशंसाया उदाहरणम्

विधाय वैरं सामर्षे नरोऽरौ य उदासते।
प्रक्षिप्योदर्चिषि कक्षे शेरते तेऽभिमारुतम्॥

कृष्णेन सामर्षे वैरिणि शिशुपाले उदासितुं न युक्तमिति प्रकृतस्य विशेषस्य सामान्येनाप्रस्तुतेनावगतिः।

विशेषनिबन्धनाया उदाहरणम्

अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः।
केसरीं निष्ठुरक्षिप्तमृगयूथो मृगाधिपः॥

तीक्ष्ण एव बहुमन्यते, न मृदुः इति सामान्यमर्थं अवगमयितुं विशेषोऽत्राभिहितः।

कारणेन कार्यावगतेरप्रस्तुतप्रशंसाया उदाहरणम्

हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिमा॥

अत्राप्राकरणिकेन्दुमण्डलगततया उत्प्रेक्ष्यमाणेन दमयन्ती-वदननिर्माणार्थं सारांशहरणेन अप्रकृतकारणेन प्रकृतस्य दमयन्तीवदन-गतलोकोत्तरसौन्दर्यस्य कार्यस्यावगतिः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कार्यनिबन्धनाया उदाहरणम्

नाथ त्वदङ्घ्रिनखधावनतोयलग्नाः
तत्कान्तिलेशकणिका जलधिं प्रविष्टाः ।
ता एव तस्य मथनेन घनीभवन्त्यो
नूनं समुद्रनवनीतपदं प्रपन्नाः ॥

अत्र गङ्गाम्भसि लग्नानां तया सह समुद्रं प्रविष्टानां भगवन्नखकान्तिकणिकानां परिणामतया संभाव्यमानेन समुद्रनवनीतपदवाच्येन चन्द्रेण कार्येण भगवन्नखकान्त्युत्कर्षस्य कारणस्याधगतिः ।

(4) विकस्वरालङ्कारः [पृष्ठं - १४०]

अर्थान्तरन्यासविधया विशेषान्तरन्यासस्योदाहरणम्

कर्णारुन्तुदमन्तरेण रटितं गाहस्व काक स्वयं
माकन्दं मकरन्दशालिनमिह त्वां मन्महे कोकिलम् ।
धन्यानि स्थलवैभवेन कतिचिद्वस्तूनि कस्तूरिकां
नेपालक्षितिपालभालपतिते पङ्के न शङ्केत कः ॥

हे काक! रटितं विना आम्रवृक्षाश्रितं त्वां कोकिलं मन्महे। कथम् ? यतः स्थानमाहात्म्येन कतिचिद्वस्तूनि धन्यानि भवन्तीति सामान्येन विशेषसमर्थनम् । ततः तस्यापि सामान्यस्य, नेपालक्षितिपालस्य भालपतिते पङ्के कस्तूरिकां को न शङ्केत इति विशेषेण समर्थनम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.



CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

• Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.



CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.